रादिति ८० तवावलोकनमोपि कः करोति जगत्त्रये। स भवेद्दुर्यशोभागी सत्यं सत्यं मदाज्ञया ८१ इत्युक्त्वा देवतां सर्वास्त्वाशापफते मुतः। स्तोकं स्तोकं वि- ५६

पुनः

भज्यैनं भक्षयध्वमिति चाशापत ८२ वन्हेस्तदा कलामेकामभक्षयतवै पुरः। सूर्यस्त्वेकां कलां विष्णुर्देवास्त्वेकां तृतीयकां ८३ जलाधिपश्च-

१-२-३-४-५-६ पाठभेद सूर्य०

नाम्ना लिंगं च स्थाप्य पूज्य ततः परं। तवापराधाद्भक्तस्यापराधाच्च विमुक्तवान ३८ ततोऽसुरान्विजित्यापस्वर्गं पूर्ववदं दिवेके। गौतमोयं महायोगी युष्मद्भक्ता
ग्रणीस्तरां ३९ अस्यापराधतस्त्विन्द्रो योनि साहस्रदेहभाक। क्लीबो भून्मुष्कनाशाच्च हास्य पात्रं दिवौकसां ४० पुनरेनं रहःपादपतिस्त्वा प्रार्थय क्षुद्रं। नष्टोहं
बुद्धिदौर्बल्यात्क्षमासारा हि साधवः ४१ शिवयोरपराधोपि लाघवात्त्वां दृष्ट्वा खलु। तमो स्तंतभक्तं त्वामपराधः क्षयं गतः ४२ मामुद्धर दयासिंधो पतितं
शरणागतं। एवंदीनं तदा योगी दयया पालयन्मुनिः ४३ शिवयोरपराधोवा तद्भक्तानां च वा ध्रुवं। विनश्यतीति त्वत्तीर्थे उपदिष्टवान ४४ काश्यां केदार
पुरतः स्नाति गौरी सरोवरे। श्रीमत्केदारनाथं त्वं पूजयागो निवृत्तये ४५ तेन त्वं पुनरेव मासाद्य स्वर्गनाथो भविष्यसि। एवमस्य वचः श्रुत्वा तथैव कृ-
तवान्मुदा ४६ त्वत्तीर्थे केदार सेवां प्राप्यापमसमाप्यतां। शृणु देव प्रवक्ष्यामि वाराणस्यां कलशेश्वरः ४७ सोप्यमुं कण्व योगीन्द्र मनादृत्या त्व-
जयिदिक्षुंयं। युष्मद्भक्तं पुरावं कृष्णां द्विष्यायुधद्यदा ४८ तदायं बोधयामास रहः श्रेयोर्थ मादरात। महापाशुपतं कृष्णां द्विषमा पैत्रमुत्सृज ४९
शिवस्त्राता नहि भवेत् भक्त द्वेषवतां ध्रुवं। इत्युक्तमेनं धिक्कृत्य निंद्यते नायुध कृत्वा ५० हस्त ह्यावाशिष्टो भूद्यदा सारस्वबाहुमान। तदा शुक्रेणो-
पदिष्टः कण्वं प्रार्थय दुर्मते ५१ शिवभक्तावमानेन जातास्ते चेदृशो दशा। इतः परं वा ते श्रेयो भवेत्तस्य क्षमापणात ५२ इति शुक्रवचः श्रुत्वा मनसा शर-
णागतः। अज्ञानादवलेपाच्च त्वाऽमानिनं दशिवप्रियं ५३ क्षमस्व करुणासिंधो क्षमासारा हि साधवः। शिवप्रसादो मे भूयात्त्वदनुग्रहतस्त्विति ५४ पुनः-
भूमौ स्थितोऽप्येवं मनसा प्रार्थयद्द्विजं। तदा समागतद् ज्ञात्वा योगी तस्य हृदाशयं ५५ दुःखितोयमिति ज्ञात्वा मनसे शुभमचिंतयत। वाराहस्यानुग्रहं प्रेप्सुर्भगवंतं
व्याजिज्ञपत ५६ यावदस्य दयातस्मिन्ना याता तावदीक्षितः। कोपएवास्य तत्तस्मिन्ततः शांतो दयानिधिः ५७ हस्त ह्यावाशिष्टं तं कृष्णाच्छोघ्रं व्यसर्जयत।
तदाह भगवान्वाराहं मद्भक्तागो दुरत्ययं ५८ काश्यां गौरीसरः स्नानान्मल्लिंगस्य च पूजनात । केदारेशकृपया मुक्ता गामामुपेष्यसि ॥ ५९
इति श्रुत्वा वचः शंभोः काश्यां लिंगं स्वनामतः ॥ स्थाप्य केदार कृपया त्वत्तीर्थे स्नानतः शिवे ६० ॥
प्रापाय मुरव्यगराती त्व भक्त महिमे दृष्टाः ॥ भूयः शृणु त्रिलोकेशि उपमन्यु स्त्वयं मुनिः ॥ ६१ ॥

छिद्रो वा कथं जातो दुर्धर्षस्याकृतात्मनः १४ सूत उवाच। शृणुध्वं मुनयः सर्वे मेनका देवकन्यका। एवं विचार्य चित्ते कथमेतं समुद्धरे १५ पापोऽप्ययं महा

योगि प्रसादोऽस्य सुदुर्लभः। मो चेदयं मत्समीपं कथमायाति मूढधीः १६ धर्माधर्म विवेकश्च सौरेरपि महात्मनः। आकस्मिका भोगहानौ स्वर्गस्त्रीषु

कथं दया १७ स्वयं लोभामस्य दृष्ट्वा पुण्य लेशं विचार्य च। धिक् गुप्त वचस्त्यज्य पुण्यभोगः पुरस्कृतः १८ कृतघ्नश्चेन्नारको त्वेग्र गतिर्नैवास्य कल्मषैः।

तस्मादुपकृतिः कार्या मयाप्यस्येति चिंतयत् १९ शिवभक्तापराधस्य कर्तव्या हि च निष्कृतिः। ततः पापं त्वस्य शुभं केनोपायेन वा भवेत् २० इति निश्चित्य

तं प्राह वसाम्रीति च सान्त्वयन्। अगाम देवी सेवार्थे कैलासं मेनका जवात् २१ तत्र देवी सेवनार्थं मागताः शिवयोगिनः। दुर्वासा गौतमः कण्वो दधीचिर्भृगु

रंगिराः २२ उपमन्युर्नारदश्च एते चैव महाविशक्ताः। अवैदशैलादि [illegible] स्कंदांश्चैव ततः परं २३ भगवंतं चिरं सेव्य देवी सन्निधिमाययुः। नत्वा स्तुत्वा

चिरं देवीं स्थितास्तत्र तदा तया २४ मेनका [illegible] देवी [illegible] नर्तत। नृत्यं दृष्ट्वा चिरं देवी ह्यजानात्ततो हसन् २५ कुतोऽस्यागमनं विप्राः किमा

श्चर्यं जगत्सु वै। इति पृष्टा अथो मुख्ये तां नत्वा शिवयोगिनः २६ नारदः प्रथमं प्राह स्वेन दृष्टं तदद्भुतं। शृणु देवि प्रवक्ष्यामि त्वद्भक्तानां च वैभवं २७ गतिः

कदाचिद्भ्रमतस्त्वीये [illegible] कृतागसां २८ [illegible] दत्तवान् [illegible] दशास्यो राक्षसेश्वरः। कैलासमपि संचाल्य

कृतागा भुवयो भुवनः २९ [illegible] गतः। अपि [illegible] केदार सन्निधौ ३० त्वत्तीर्थ स्नानतः श्रीमत्केदारस्य

सेवया। [illegible] विमुक्तोऽपि नंदी शापात् [illegible] गतः ३१ नंदिनं [illegible] शुभात् [illegible] नोद्धृतं। अवाप्य स [illegible] नष्टस्त्व [illegible] कोऽपि चारिकेव ३२

दुर्वासा यं महायोगी युष्मद्भक्तापराधिनाः। अनेन [illegible] दाद्भज्यं परां ३३ न धृत्वा [illegible] गर्वात् प्राक्षिप तं गजमस्तके। मदांधेन ग-

जेनापि सा [illegible] भूतले पुनः ३४ न गृहीते [illegible] वाचापि [illegible] गर्वतः। तदास्य शापतो भ्रष्टो गतश्रीः कोऽतिकुत्सितः ३५ दिवांधबद्दैत्यभीतः स्थितो मंदाकंदे।

पुनः प्रीत्वा प्रादेत्य प्रसादाद्भुमदिदृक्षवान् ३६ चिरं दुःखात्तवक्षेत्रमागत्य तव तीर्थके। श्रीमत्केदार पुरतः कृत्वा स्नानं यथाविधि ३७ नाद्दृपांस्त्व-

अ०१७

५५

१-पाठभेद-सूर्य०

कर्मणां साक्षी मृत्युः पृष्ठगतो गले। स एवास्य प्राणहारी साक्षात्तेषां परो यमः १४६ तेन ज्ञातं किमस्त्यत्र सर्वज्ञेन महात्मना। स सर्वप्राणिनां शास्ता-
धर्माधर्मविवेचकः १४७ मृत्युरूपेण सर्वेषां कर्माणि प्राणिनां सदा। गले पृष्ठे निगूढः सन् तिष्ठन्प्रत्यक्षं पश्यतो ध्रुवं १४८ अस्य कर्माणि सर्वाणि
दृष्टानि श्रुयया पुनः। अनर्थमात्स्य पुरः सर्वनरकेषु दारुणं १४९ प्रथमं पुण्यभोगस्य कल्पनं केन हेतुना दृष्टमप्यत्र वै स्वर्गाधिकारोऽस्य नैव खलु १५०
किं वा स हृदि जानाति सर्वधर्मरहस्यवित्। मयि प्रेषित ...भोगाय च दारुणं १५१ तस्मात्पापिन्यपि महाविशेषोऽस्तीति मन्महे। शिवपुण्यं
स्वल्पमपि तारयेन्नात्र संशयः १५२ इति वहु विचिकित्सा संयुतं मेनकाया हृदयगतरहस्यं शंभुभक्तप्रभावं। सकृदपि शिवभक्त्या यः शृणोति
प्रसंगात्सकलकलुषचित्तोऽप्याश्रयेदीशपादं १५३ इति श्री काशीमूलरहस्ये ब्रह्मवैवर्ते खिले काशीकेदारमाहात्म्ये षोडशोऽध्यायः १६
ऋषय ऊचुः। व्यासप्रसादसत्पात्रभूत सूत महामते। पातकाशेषसंघघ्न रहस्यं वद शूलिनः १ दिव्यस्त्री मेनका पश्चाद्दुर्धरं विचिकित्सया। किमकार्षीद्दुर्धरं
साप्युपायात्कथमुद्धृत २ अहो महाश्चर्यसारं ते कमप्याति वैभवं। शिवपुण्यं पुनस्तादृक् शिवयोगिप्रसादजं ३ अज्ञानन्नोदृशं लोका व्यर्थकार्यप्र-
संगतः। निरर्थकं जन्म वृथा कुर्वन्त्यज्ञानतः खलु ४ क्षणमात्रमपीशस्य चरितं शृणुयाद्यदि। तत्क्षणं चित्तकालुष्यं प्रसह्य प्रणुदेद्ध्रुवं ५
तादृशस्यापि पापस्य दुर्धरस्य कृतार्थता। प्राप्ता हि किं पुनः शंभोर्भक्तानां पुण्यकारिणां ६ कथमेवं न संदेहः स कृतिः शंभुभक्तितः। त्वमस्माकं
समुद्धर्ता रहस्यस्यापि देशतः ७ शंभोर्भक्तस्य माहात्म्यं केन वा वर्णितुं क्षमः। अपराधकृतश्चापि स्वस्मिन्तु दुर्धरस्य सः ८ दयामेवाकरोद्योगी
क्षमासारा हि शांभवाः। किंचित्पुण्यं ददौ प्रादात्तादृशस्य तु योगिनः ९ धावत्कर्मैकपुण्यस्य पतनाच्छिव सादभुत। तदेव बीजं सर्वाघध्वंसने दुर्धरस्य हि।
शिवयोगिप्रसादेऽपि तत्पुण्यस्यैव वैभवं। तादृक्प्रसादमहिमा यस्य योगिप्रसादकृत् ११ यम... स्वर्गस्य मेनकाया अभूदपा। एवं पापपर्यायाद्दुर्धरस्यो-
द्धृतिस्त्वभूत् १२ तस्मात्तच्छिवपुण्यस्य लेशोऽपि यदि मानवैः। प्रसंगादपि संप्राप्तस्तारयेदपि पापिनं १३ वद विद्वन्ततः पश्चात्मेनका वा किमाचरत्। उ-

१-२-पाठभेद सूर्य०

कदापि नरकात्तातो मे नास्तीत्यवदद्यमः। अल्पभोगे किं मम स्यात् तथापि क्षणभंगुरे १२३ इति चिंतासमाक्रांतस्तूष्णीको दुर्धरोभवत्। तदा तं मेनका-
दृष्ट्वा प्राह दुःखितमादरात् १२४ स्वर्गीयं सर्वभोगाढ्यः सेवकाहं मनोनुगा। किं भाव चिंतसे दृस्त्यं न सुखं भोक्ष्यसे मया १२५ प्रेषितो धर्मराजेन
तदाज्ञा मे गरीयसी। न सुखं भोक्ष्यसि यदि मयि कोपं करिष्यति १२६ यथेच्छसि तथा भुंक्ष्व मया सार्कं च देववत्। अन्यच्चकं कापि तव चेत्करोमि वद-
तामपि १२७ तवाधीना कृता चाहं स्वतंत्रा यमशासनात्। यथोक्त्वा प्रेषयत्कालो ज्ञातं ज्ञानदृष्ट्या मया १२८ ज्ञात्वा तद्भोगकालं च कैलासे लेवदं पुनः। माशु-
चस्त्वं क्षेममेव भवेत्ते त्विति मे मतिः १२९ भुंक्ष्व भोगान्यथाकामं गरीयः शिववैभवं। एवमुक्तस्तया प्रीत्या दुर्धरो व्याहतां पुनः १३० शृणु भद्रे प्रवक्ष्यामि
त्वं ममेष्टा न संशयः। पापिनामहमेवाद्यो दुरात्मनां त्वमग्रणीः १३१ मामुद्धरिष्यसि धीनाम भवं नाकोपया। सत्यं सत्पुण्यदाल्लोके मन्यंते साधवो
नघ १३२ एवं देवयोनिर्मत्कृत्यं ज्ञातं ज्ञानदृष्ट्या त्वया। धारयंति ते प्रपन्नोस्मि [illegible] साहि साधवः १३३ एवं दीनवचः श्रुत्वा शिवभक्तापि मेनका। महापापकृतस्त-
स्य ज्ञात्वा तद्दौर्गत्यमपि १३४ [illegible] कर्तव्यं शिवभक्तिदं। माहृशा न कृतं चैताच्छिवयो भक्त्या कथ १३५ एवं चिंत्य हृद प्रणम्य शिवाशिवौ। शिवभक्तापराधो हि [illegible] कथं व्रजेत् १३६ अनुग्रहोपि तस्यास्ति सेवा तुष्टस्य [illegible]। महापातकजातोनाशोपि नाप्नोत्सुपाव-
तः १३७ शिवापराधस्य तु मे निष्कृतिर्नैव दृश्यते। [illegible] कृतं [illegible] धिकं मन्यते शिवः १३८ संहृतं शिवभक्त्या गयं मनः पूर्वस्थितस्त्वयं।
तादृशं नारकिं मेग्रे प्रेषयत्सौरिरादरात् १३९ तस्मादनुग्रहं [illegible] मे मतिर्न हि नेतरः। नो चेत्तादृशे पापे घोरे श्रोता कथं दया १४० किंचिद्भुक्तं
ज्ञात्वा भाविनं करुणानिधिः। सर्वधर्मपरो ज्ञाता पापानामपि तादृशः १४१ क्व पुण्यलेशखद्योत महापापांधकारके। मग्न एव भवेत्तत्त्वं नात्र कार्या वि-
चारणा १४२ तथाप्यारघर्षमत्यत्र दुष्टव्यं किं शिवपि ध्रुवं। कीदृशः शिवपुराणस्य लेशस्य महिमा [illegible] १४३ केचिदभ्युदयो भानोरिव गाढांधकारहृत्। चतु-
रधिककोटीनामशीतिनाम्नां ह्यपि १४४ नालमस्य महापापभुक्त्यै कल्पायुतावधि। तादृशोयं महापापी दुर्धरो निर्घृणः खलः १४५ एतस्य

तदधस्य तुलेखायां शिव योगि प्रसादतः। उत्कृष्टं कस्य पुष्पस्य शिवार्पणमिति ब्रुवन् १०१ चौर्याद्भीतो वहिः स्थाने पतितस्य शिवोपरि। कांचीभूमिर्लिंगमयी सर्वत्र तिलशो मुने। यत्रापतत्पुष्पं पातस्तत्र लिंगं स्थितं त्वधः १०२ अस्ति लिंग पुष्प पतन पुण्यं दृग्गोचरं त्वगात। यमस्तदा तं दृष्ट्वा मुमुवाच प्रहसन्निव १०३ अस्त्यपि पुण्यलेशोऽस्ति चित्रं किमिति चिंतयन्। हसन्नमुं पुनः प्राह किंचित्पुण्यं तवास्ति वै १०४ नारकस्तु भवद्देहं नित्यमतैव ते शृणु। किंचित्पुण्यस्य भोगं त्वं भुंक्ष्वाग्रे पोपरोचते १०५ अत्यंतलंपटः कामी नारकी त्वं सदा ध्रुवं। इत्युक्तो यममाहायं यथेच्छसि तथा कुरु १०६ तथापि मे कथं जातं पुण्यं वद रविःसुत। आजन्म पापकृदहं मे पुण्यमिति वक्ष्यसि १०७ इति पृष्टो दुर्धरेण धर्मराजो वदत्तदा। शृणु दुर्धर ते पुण्यं ~~वक्ष्यसि १०७~~ चोरिता पुष्पमेकं १०८ त्यक्तं त्वया वारे वाट्या शिवार्पणमिति ब्रुवन्। लिंगस्थितमधस्तत्र वचसा तेपि पतित्वभूत् १०९ त्वया प्यजानता पुण्यं तव किंचिद्विवर्तते। तं भुंक्ष्व पूर्वं पश्चात्ते नरकः स्तीव शापूवत ११० तच्छ्रुत्वा दुर्धरः श्रुत्वा पश्चात्तापेन तापितः। अहो व्यर्थं गतं जन्म दुर्बुद्धेर्मे कुसंगतः १११ किं कृतं किं कृतमिति मया नर्च्य शिवं शिवं। भवत्वग्रे किं फलं मे वदेति यममानमन् ११२ पप्रच्छ दुर्धरो भक्त्या तदा प्राह यमः फलं। शिवार्पितस्य पुष्पस्य फलं वक्तुं न मे क्षमं ११३ तथापि गच्छ स्वर्लोके भोगस्ते चेदृशो भवेत्। शिव एव विजानाति शिवसात्कृतिजं फलं ११४ इत्युक्त्वा प्रेषयामास स्वर्गं दुर्धरमादरात्। गच्छ त्वं मेनकागेहं त्वया भुंक्ष्व सुखादिकं ११५ सा गच्छति प्रतीक्षते कैलासं सेवितुं शिवं। तत्र स्वर्गात्ते भोगं स्त्रियत्कालावधिं स्फुटं ११६ सैव मात्वा प्रापयता त्युक्त्वा त्वां मे वदस्व तां। इत्युक्त्वा प्रेषयत्कालो दुर्धरं मेनका गृहं ११७ यमाज्ञया स्वर्गात्सोपि तत्क्षणात्तेन कांतिकं। तां दृष्ट्वा सर्वसौभाग्य युता सापि च दुर्धरः ११८ तया तिथ्यविधानेन पूजितोपि विधानतः। पतिभावेन शृंगार हावभावक लादिकैः ११९ स्रग्गंध वस्त्र भूषाढ्य शय्यायां स्थापितोपि च वीणा वीणा युतो हूता लिंगितोपि तया रहः १२० नैव भोक्तुमना जातः किं स्वप्नेनेति चिंतया। इदं महाभोगपात्रं जातोऽहं पापेनावरः १२१ सर्वाभीष्टप्रदे शंभौ वाङ्मात्र कुसुमार्पणात्। कदा वदस्मेनकेयं गच्छेति यममंदिरं ॥ १२२ ॥

१ – पाठभेद सूर्य० २ – पाठभेद सूर्य०

धनं गृहीत्वा गच्छामि यत्राभवाति दूरतः। इति निश्चित्य मनसा तस्य सेवापरो भवत् ७४ स्वामिन्नायाहि मे नाथ धन्योस्म्यद्य तवागमात्। आज्ञाप्य तां ते का
सेवा कर्तव्या किं करोमि ते ७५ सुखं तिष्ठाहमत्र स्थाने भीरनास्ति केनचित्। एवं सुजनवत्प्रार्थ्य दुर्जनित्तं व्यधो हयत् ७६ तत्र स्थितो महायोगी प्रार्थित
स्तेन दुर्धिया। पाद संवाहनादीनि प्रीत्या कार्याण्युपाचरत् ७७ सर्पं हत्वा विषं गृह्य कुंडिकां दूरिविनिक्षिपत्। अस्याचमनतो योगी क्षणेन मृतिमाप्स्यते ७८
अनायासेन तं हत्वा धनी भूत्वा व्रजाम्यहं। इति स्थिते दुर्धीरे थ योगी सुप्वा तत्र वै ७९ दुर्धरोपि तत्र स्वपद्ये रात्रौ दुर्गमोस्ति मे। मृते त्वनंतां त्वस्य तस्मा-
त्स्मिति योगयता ८० इति सुप्वाप सोप्यत्र तदनंतरतो मुनिः। जलमुक्तयर्थं मत्याय पूर्णां तां कुंडिकां स्पृशन् ८१ पूर्णा मत्तीति तत्तोयं किं चित्तत्पात्रक्षिपत्परे। तत्र
स्थितं दुर्धरस्य पात्रे जलयुतं निधौ ८२ तस्मिन्निपात तत्तोयं किंचिद्विषयुतं तदा। कुंडिकां गृह्य यातेराट् बहिर्गच्छत्स्म सो गृहे ८३ स्तंभ घट्टनतः स्फुट
सर्वं तोयं गतं भुवि। तदा योगी जलाभावान्निगृह्य जलमोचनं ८४ पुनः सुप्वाप तृष्णां स निर्वाक्यं किमपि योगिराट्। ततः क्षणाद्दुर्धरोपि जाग्रत्तुत्थाप्य तं

मुनिं ८५ मृतोवानेति सामीप्यतले तिष्ठन्नीक्ष्यत। तस्मात्तं तदा दृष्ट्वा न मृतो ध्यायि विषं मुनेः ८६ उत्थापयामि पतोयं ग्राह्यामीति चिंतयन्। तृषार्त्तोहि
जलं किंचित्पास्यामीति स्वभाजनं ८७ गृहीत्वा ह्यपिबत्किंचित्तोयं विषविमिश्रितं। तत्क्षणं मृतिमापासौ स्वदुष्कर्मवशान्मुने ८८ ततः प्रातः समुत्थाय
मुनेराहूतवान्प्रभुं। कोपि नाप यदा तस्य प्रतिभाकं न निर्गलत् ८९ तत्समीपं समागत्य मृतं दृष्ट्वा स हा मुनिः। शुशोच बहुधा चित्ते मत्तेवं कृतवानिति ९०॥
ततः परं महायोगी ज्ञानविज्ञानसागरः। वेदागमपुराणोक्तधर्मविज्ञातशास्त्रवाः ९१ शान्तहृत्कृपया शिवं ध्यात्वा किमेतदेति चिंतयन्। पश्यतस्तस्य तत्क-
र्म सर्वं स जन्मतोपि दत्त ९२ तथापि कृपया योगी पतितोद्धारसंभवः। निजागः पृष्टतः कृत्वा किं चित्ते स्वापरा प्रवेदन् ९३ शर्मभवत तस्येति दुर्धरे नग्रहं ददौ।
तद्धत भगिना शाह्यकार्या आपमहामुनिः ९४ दुर्धरो यम दूतैश्च निर्दयं मर्दितस्ततः। नरकाणां पात्रमेवं कोपि प्राप्तो न भूतले ९५ कल्पकोट्यर्बुदे नापिना-
स्तीत्यस्येति निष्कृतिः। एवं वदन्पुनर्धर्मं ज्ञातो वै यस्य तां विवं ९६ आजन्मा पूर्विवत्र शुभोपि धर्मेनास्य फलाफलं। नास्त्यत्र पुण्यलेशोपीत्यद्य दद्य मसान्निधो ९७
सम्यक्परीक्ष्य तितं प्राह पुनः पुनरपि प्रभुः। नास्तीति वचनं श्रुत्वा आपृच्छ्यपि भूत्तदा यमः ९८ करास्य मुक्ते नरकादिति प्राह स्वलेखकं। कल्पकोटि शतेनापि-
-नास्तीत्याहेति निष्कृतिः ९९॥ तदा यमः स्वयं लोवामानीया पश्य दस्यवे। अनुग्रहवशात्त्वं भो भक्तस्य प्रिय योगिनः १००॥

42

१-२-३-पाठभेद मूर्च्छा०

कार्यसिद्धिर्भवेद्ध्येया स्त्रीशूद्रया समश्रोचत । स्वधर्मचारी भूपोयं निराकर्त्तुं कथं क्षमः २९ ब्रह्मदत्तवरो विप्रभक्तो मद्भक्तिमान्नृपः । पूर्वजन्मनि मां सेव्य

प्राप्तो सो सार्वभौमतां ३० मद्भक्त सेवया प्राप्त महायोगविभूतिमान् । भोगेभ्यो विरतिस्तस्यापि मम सेवनं ३१ नं मुंचति चिरं भोगं भोजयित्वा

विना नृपं । भवानं मुगायते मेद्य काश्यां विपुले पर्यातिमिथे ३२ किं करोमि क्व गच्छामि कदा काशीं पुनर्लभे । इति चिंतापरे देवे देवी प्राह सदाशिवं ३३

माशु चल्वं महादेव राज्ञस्त्वत्पराधतः । अचिराद्भोग विच्छित्तिर्भविष्यति न संशयः ३४ सर्वेषां भोगिनां पुंसां त्वद्रागो भोगनाशकं । अज्ञात्वापि

कृतं चैतत् ज्ञात्वा किमुतनो फलेत ३५ सर्वज्ञस्यापि ते खेदकारी राजा वियोगतः । तवाल्पत गिरिं काशीं ज्ञात्वापि त्वां न चान्ययत ३६ तस्मात्त्व-

पराधेन त्यक्तभोगे चिरं कुर्वेत् । योगिभ्योपि दिव्य गणप विघ्नेश ब्रह्मविष्णुभिः ३७ शनैः प्रतार्य धर्मेण त्यक्तराज्यं नृपं कुरु । इति श्रुत्वा वचो देव्यास्त

थैव कृतवान्हरः ३८ शिव हेलाप संजाता पराधेन महीपतिः । चिरभोगे स्पृते प्येवं त्यक्तभोगो भवत्क्षणात ३९ अकुर्वतां गुरोर्वाक्यं शिवा

गस्कारिणां मुने । ब्रह्मविष्णु पदं वापि नश्येदन्यस्य किं पुनः ४० वृद्धो भूत्वा महाविप्रो धर्मं तस्याजयत्पुरीं । दृष्ट्वा लद्दृश सांकर्य त्यक्त

राज्यो भवन्नृपः ४१ तदा भृगुः काशीतोकस्त दृष्ट्वा तं नृपं तदा । प्राचीन प्रीतिकार्यो तं स्नापयित्वा यथाविधि ४२ पूजयित्वा चकेदारनाथं त्वागो निवृत्तये ।

कृत्वा कृतार्थमप्रेषी शिव धाम निरामयं ४३ यतः शिवरहस्यज्ञ गुरुः शिष्यं कृतार्थयत । इति श्रुत्वा वामदेवः कुमारं प्राह सादरं ४४ भगवन्सं-

शयो मे स्ति तन्नोदय हृदि स्थितं । दिवोदासः पूर्वभवे कश्चासीत्कं समाश्रयत ४५ कोयं शिवज्ञाननिधिर्यमुपास्य दृशोभवत् । निजयोगप्रतोषेन-

तं किंचापि निराकरोत ४६ एतत्सर्वं मशेषेण मां बोधय कृपानिधे । इति पृष्टो वामदेवमुनिना ब्रह्मविन्मुनिः ४७ स्कंदः शोवामदेवाय व्यग्रशुद्धवे-

स्याह सादरं । पूर्वं कांचीपुरे विप्र प्रसादो नाम वै वितोक ४८ धनाढ्यो वेदवित्प्राज्ञो देवब्राह्मणभक्तिमान । एकाम्रनाथ कामाक्षी भक्तिमान्पुण्यसंचयः ४९ स्थित

स्तस्य सुतो जातो भोगिन्यां वारयोषिति । स्वपत्न्यां च सुताभावात्तं पुपोष प्रियादरात ५० कालेन स मृतिं प्राप धनं सर्वं सुते पयन । पैतृकं धनमाप्यायं दुर्धरो

नाम तत्सुतः ५१ यौवनं प्राप्य दुष्टात्मा धनमत्तोऽतिकामुकः। दासीसुतः पूर्वमेव उन्मत्तो गर्वितो धनी ५२ मद्यमांसरतः कामी वर्ण्यावर्ण्यविवर्जितः। आ-
चांडाल्यो धनबलात् भुक्त्वा स्तेन च कुस्त्रियः ५३ यत्र रूपवती नारी तत्र तत्र धनव्ययात्। प्रलोभ्य भुक्ताः कामिन्यो याः स्त्रियो वित्तलंपटाः ५४ स्वमातं
येश्च पत्नीमपि दुर्योगमकुलात्। एवं दुराचाररतः कालेन धनसंक्षयात् ५५ चौर्यं कृत्वा च दास्त्रीणां धनं नगरराष्ट्रके। ततः परं धनाभावात्कस्या-
पि च द्वारपोषितः ५६ सेवकोऽभूत्तया भोक्तुं पुष्पाहरणकर्मणि। तस्याः प्रीत्यै पूर्वराज्ञां वै उद्याने प्रलोभतः ५७ पञ्चिताञ्चि च पुष्पाणि चौर्या-
न्नीयानि यच्चता। एवं कतिपये जाते दिने चोद्यानपालकाः ५८ राजोद्याने पुष्पाणां अभावः केन हेतुना। इति चिन्त्य तदा पूर्वराज्ञा वागत्य जागर-
न् ५९ तदा चोरं भिसं धर्तुमनुधावन्कृतत्वराः। तदा यं पौरैः कान्तं च्यवतन्नाद भुवं वनात् ६० अपतत्पुष्पमेकं तत्तस्यां तत्र भूतले। तद्दृष्ट्वा पति-
तं पुष्पं प्रियार्थं ग्रामितिं वचनं ६१ भया द्वाहोपालकानामधावन्पुरुमाविधान्। दत्त्वा पुष्पं तद्दिने तां भुक्त्वा रामो यथा सुखं ६२ पुनर्ग्रामे च्यामि चेन्मृ-
त्यु मेसा यातोस निसृजन। भयो दृष्टेगोच केनापि वधं प्राप्स्यामि निश्चयं ६३ इति कृत्वा मतिं चोरस्य गान्नगातो बहिः। धावन्धावन्भारा-
भया देशादाज्ञादार्हगतः ६४ भिक्षामुक्त्वान्ने विन्ध्यमागतः पर्वतं तदा। तत्रैकोऽचरन्मृगव्याधं सेव्यतेऽपि दीनः ६५ ततोऽपि मोचान्संसेव्य
तेषामप्यभवद्रिपुः। अत्यंत दुःखितो त्वन्नाद्यैः संभाष्य मिरमुधां ६६ श्रीमल्केदारभूभागे विकृतं वारोजो गमनं। तेः स्वच्छभिक्षयन्नन्नं केवलं
स्वोदरं भरि ६७ देशाद्देशं भ्रमन्नाद्र भूमौ कालं निनाय सः। काशीं शिवालवटके वाहग्धर्मशालाभुवं वसन ६८ मार्गगो भिक्षयन्नत्रो चार्थ
गापिच जीवितः। तत्र मार्गगतः कोऽपि धनिको श्रावानंदाभिधो यतः ६९ श्रीमत्केदारयात्रां स कुर्वन्नात्य विमुक्तकं। रात्रौ तद्धर्मशालायां सुष्वाप
विजने वने ७० दृष्ट्वा तं निमिशा पापो तं दृष्ट्वा शिवयोगिनं। धनं भवेदस्य हस्ते समर्थो दृष्टपुनस्तेह्यं ७१ भिक्षावृत्ति यदि भवेत् ग्रामे सा किं न तिष्ठति। भि
क्षापि तत्र तत्र मिलति तत्त्यक्त्वा विजने कथा ७२ इत्यागतस्य धन ७ येत नामात्ये वात्र वै रतः। एनं (स्नेहोस्य) रात्रौ वधिष्यामि छद्मनाकोपिनात्र वै ७३

१-२-३-४ पाठ भेद सूर्य०

सनत्कुमारं प्रपच्छ वामदेवोऽथ योगिराट्। सनत्कुमारोऽदितं च नाथ धर्मं वदत प्रियं ७ मत्कृते मामपि प्राह भाषितं मुनिना पुरा। सनत्कुमार उवाच वामदेव शृणु मुने दिवोदासो नृपाग्रणीः। ब्रह्मणा प्रेरितः काश्यां राजाऽभूदखिल क्षितेः ८ अत्र कस्यापि देवस्य प्रभावो न भवेदिति। वेधसा प्रार्थ्य च वरं त्वं प्रतापाविता मही ९ तदा देवाः शिवं प्रार्थ्य निवेद्य वरमात्मनः। नृपायदत्तमोक्षानं नीतवान्मंदरं तदा १० शंभुर्भक्तपराधीन स्वभक्तं मानयन्विधिं। अनगच्छत्स पर्वीणो मंदरं विधिगौरवात् ११ अग्निवायुजलेन्द्रेन्दु मुखा देवाश्च भूपतेः। तेजसाऽसह्यतां प्राप्य चैर्ष्ययाऽतिद्विषोऽधिनः॥१२॥ तद्धर्महन्त्यत्वं पदमस्यात शंकिताः धर्मलोपोऽस्य कर्तव्य इति चिंतयाम्य सुपया १३ नववर्षो नाशीरिंद्रोऽपि नववर्षाग्निः कज्वलन। अस्मान्विना कथं त्वस्य धर्मवृद्धिर्भवेदिति १४ तदा राजापि देवानां ज्ञात्वा योगेन वै कृतं। स्वतपो योगबलतः पूर्ववद्दाशाश्वास ह १५ पर्जन्यवायुवह्निचंद्रसूर्यतां प्राप्य योगतः अनसूयैव देवेषु सर्वां भूमिमपालयत १६ तदापूर्वयुता देवाः शिवं तपावाधिता वसन्। एवं स्थिते तदा राज्ञि पुरोधास्तस्य वै भृगुः १७ शिवज्ञानवतां श्रेष्ठः शिवषत्यक्तं पुरं स्मरन्। जगत्सर्वं शिवव्याप्तं तथापि प्रमिदं विभोः १८ पुरं त्यक्त्वा न गंतव्यं शिवे नाथ तद्दासमान। राजानंमाहते भूप पुरं च शिववर्जितं १९ कुरु तेन भवेच्छ्रेयो मो वेदचित्ततात्व। राज्ञा तदाह तं विप्रं कस्यापि चिरता नहि २० व्याजेनानेन संतर्तुमिच्छे शंभु प्रसादतः २१॥ मत्तपः फलभोगस्य नांतमस्तिसमहाप्रभु २१ त्वं न जानासि किं विप्र तस्य भंगः शिवागमः। नान्यतोऽस्तीति निश्चित्य प्रसादं काशितारविरात २२ आगकर्तव्यमेवाज्ञा त्वेष्ट पुभाशितुः। मद्राज्य भंगो भगवान्यातिष्यति कथं चन २३ तदागतो निवृत्तिं च लब्ध्वा शंभु प्रसादतः। प्राप्त्याभि शिवपादाब्जं भवतानुग्रहादपि २४ क्षमस्व गुरुनाथेति प्रार्थ्य विप्रं नृपोरतः। पूर्वं शिवाराधनतः प्राप्त भोगविरक्तितः २५ क्षणभंगुरमालस्य भोगजातं शिवास्तधीः। शिवपदप्राप्त्यै शिवं नाकारयत पुरे २६ तदा सर्वमहेशानः काशीं विश्लेषखेदतः आते प्रियायतः काशीं स्वात्मभूतां शु मुक्तिदा २७ भक्तानामिति तां प्राप्य विहर्तुमतिलालसः। कृतप्रयत्नो ब्रह्मादिदेवैः स्वात्मगणैरपि॥ २८॥

१ - यह वाक्य सू° की प्रति में नहीं है।

१-२-३-४ पाठ भेद सू°

कीदृशी सा महागंगा साक्षाच्चन्द्रस्वरूपिणी। यस्या दर्शनतो मुक्तिर्न जाने स्नानजं फलं ४५ विमोक्षदं प्रयात्येव यस्यां प्रीतिकरी कला:। तादृश्य-
पि शिवाख्यस्य मुक्तये प्राप तत्त्वत: ४६ यमुना कीदृशी साम्यलोकं शून्यमकारयत्। वल्लभा च महाविष्णोस्तादृशापि महानदी ४७ सरस्वती कीदृशी
सा परा शक्तिस्वरूपिणी॥ यया देवास्त्रयः श्रेष्ठाः पुं दुर्लभ विचारतः ४८ ब्रह्माणं भार्यया बहुधा वियुक्ता नायके पुरा। प्रसादा ब्राह्मणः पद्मचा-
त्समाधाय सरस्वती ४९ प्राप्ताः स्वस्य पतीन्कालं तेरतावहयत्नत:। तादृक्प्रभावयुक्तापि वाणी दिव्यतरंगिणी ५० एते द्वे अपि गंगापि यस्मि-
न्सरसि संगता। प्राप्ताः कृतार्थतां विप्रा इत्येवं शिवभाषितं ५१ तादृशस्य च तीर्थस्य प्राचीनत्व विशेषतः गौरी कर्ता मरणेनां च पतनान्म-
शिकार्णिका ५२ ऐतो दादेश महातीर्थे योगादूर विधानतः हरपाणख्य नाम्नात द्वारे तीर्थमभूत्पुरा ५३ तादृशस्य रहस्यं च केदारेशस्य चापि
यत्। रहस्यं दुर्लभं लोके तथापि शिवभाषितं ५४ गुरुप्रसादाद्धन्योऽहं यूयं धन्या न संशयः। धन्या न वयं भर्तारं यं प्रच्छेत रहस्यकं ५५ धन्य-
स्तु वामदेवोपि यः स्कंदं शाप्रपृच्छत। येनैतत्परमं गुह्यं लोकोपकृतये परं ५६ अस्माभिरपि विज्ञातं रहस्यं शिवभाषितं। तस्माज्ज्ञानधवि-
प्रेन्द्राः कृपा शंभोर्गरीयसी ५७ इति च मुनिवरेन्द्रान्प्राह शंभोः रहस्यं चिरतर परिणा करणी तीर्थमप्यादरेण। श्रवण भवतरमूढ्याः काशि
केदारनाथं स पुनरिह जनन्या गर्भवासं न याति ५८ अमुं गुरु मुनीन्द्रैश्चर्चितं सद्रहस्यं घनकलुषवनानां दाहदावाग्निरूपं। सकृदपि
शिवभक्त्या यः शृणोति प्रशस्तं स पुनरपि भवाब्धौ नावगाहेद्धि सत्यं ५९ इति श्री काशी मूलरहस्ये ब्रह्मवैवर्त्ते खिले काशी केदार माहात्म्ये पंच-
दशोऽध्यायः॥ १५॥ ऋषय ऊचुः रोमहर्षण संभूत शिवज्ञानैक सागर। दिवोदासः कथं शंभोरपराधी बभूव ह १ अत्यंत धर्मनिरतः प्रजा पालन
तत्परः। यः स्वयोगेन तपसा सार्वभौमत्वमागतः २ यस्य कीर्त्तिर्गुणि लोकेपि प्रथिता देवसंसदि। श्रीमत्काशी नृपत्वं च तेन पीठप्रसादतः ३
स्वधर्मतो महीं पाल्य प्राप्तात शिवधाम च। एवं तस्कीर्तिर्गैर्गुह्य श्रुतं पूर्वं त्वयैव हि॥ ४॥ तादृशस्य शिवागोपि कथं जातं गतं कथं। एतत्कथा रह-
स्यं नो योग्यं श्रोतुं यदारय ५ इति पृष्टो मुनिवरैः सूतः प्राचार्य तान्पुनः। शृणुध्वं शिवभक्ताग्र्या इमं प्रश्नं पुरा मुने॥ ६॥

१, २ - पाठभेद सूर्य० 3 - यह वाक्य सर्व में अधिक है

विश्वेशमर्चयत ॥२२॥ श्रीमत्केदारनाथं च प्राचीनां गौरीकालिकां। अभ्यर्च्य प्रथमं काश्यां विमोक्ष्यामि शिवागतः ॥२३॥ विश्वेशं गौरीं च संवेल्य निवसेत् स्थिरा। इत्यध्येगाथा पुनैः काश्यां स्थित्वा रविलांगलः ॥२४॥ एकदेशं गतो भूप पितृन् धर्मतुमं बुधिं। मत्संगतनदी सर्वा ... प्रवृत्तक व्रजे ॥२५॥ इत्युक्त्वा रविजां वार्ता स्ववृत्तांतं सुरापगा। ताभ्यां साकमनेकाभिर्नदीभिः संगता चिरात् ॥२६॥ अविमुक्तक्षेत्रभागं दक्षिणाजं तदा दिदृक्षु। प्राप्य काशीं मत्तास्यां प्राणामुत्सन्मुखा भवत् ॥२७॥ श्रीमत्केदार ... विश्वेशगौरीकालीं द्रुपादिकाः। देवगण ... भक्त्या ... पदे पदे ॥२८॥ श्रीमत्केदारनाथाग्रे प्राचीनां गौरीकालिकां। देहांतं विलेस्तीर्थे पुलं तीर्थं घनाशिनी ॥२९॥ सर्वपापाधिक ... राधन ... नद्यां तारितुं जीवान्वादन्मत्तेव रितु ॥३०॥ तां प्राप्य प्रथमं गंगम् षिगाशा ... सम्भ्यगात्। श्रीमत्केदारनाथं च संपूज्य ... ॥३१॥ ... दुग्ग विमुक्ता ... गतः। ध्यायन्केदारनाथाग्रे मृतादप्राच्यमनि स्थिता ॥३२॥ तदा प्रसन्नो भगवान्प्राह गंभीरया गिरा। प्रिये ... स्त्वं कृत्वा मुक्ता त्वं ... पाधतः ॥३३॥ ... मत्तीर्थे ... स्थाने ये स्नाति मानवाः। मदागत्ते पि मुक्तास्ते किमुतान्याद्य संततेः ॥३४॥ अन्यक्षेत्रकृताद्यानां काश्यां मुक्तिर्न संशयः। मयि काश्यां कृताद्यानामपि मुक्तिरिह प्रिये ॥३५॥ त्वत्संगत मत्तीर्थे गौर्याख्ये मत्पुरः स्थिते। नभोमासि विधुवारे राका पुके विशेषतः ॥३६॥ अत्र स्नानं पूजनं मे दुर्लभं प्रिये। लभेत्स्नानं ... तपसा सोहमेव न संशयः ॥३७॥ अघताद्वपुण्यदिनं प्राप्ता ... मत्पुरः। एवं पुराय दिनं नृणां लभते बहु पुण्यतः ॥३८॥ तस्मात्कृतार्था त्वमपि ये च स्नान्ति ... तेपि हि। इलः परं त्वं विश्वेशं सेवतां गौरीकालिकां ॥३९॥ ... भवाम स्वल्पेनापि व्रजमहोदधिं। इत्युक्त्वां तदा ... नत्वा गंगां ततोभ्यगात् ॥४०॥ गौरीकर्यादि विश्वेश ... मुदिता ... एवं गंगामहेश्वरे पूर्वं जाता ... पुनर्मुक्ता मत्तीर्थे केदारेश प्रसादतः। एवं सनत्कुमारात् श्रुत्वा वेद भुभक्तिमान् ॥४२॥ वामदेवो मुदं लेभे ... भूपतेः। इमां कथां नाथशर्माप्यनवद्यां भूपादिशत् ॥४३॥ तमिमं ... मीं च प्राह काशीकोत्तमः। किं वा ... श्राद्धं मुनिपुंगवाः ॥४४॥

१-२-९१८ ...

१०वै०
५०

का०के०मा०

ऋषय॰ बादरायणासच्छिष्य त्वन्मुखांभोजतः परं। श्रुतं रहस्यं केदारनाथस्य परमाद्भुतं १ कदा प्राप्तो महाविष्णुः केदारे पूजितुं शिवं। कालभेदरहस्यं त्वमस्माकं वक्तुमर्हसि २ इति पृष्टस्तदा सूतो मुनीन्द्रैः शिवयोगिभिः। तदा प्राह हृतन्ते पामाप्रायं संविदन्हृदा ३ सूत उवाच। शृणुध्वं मुनयः सर्वे रहस्यं परमेशितुः। वेदागमपुराणेतिहासशास्त्रादयोऽखिलाः ४ अनादयः परेशस्य निश्वासात्प्रजाता स्थिराः। कदाचित्कालपाकेन मलिना विरहा अपि ५ शाश्वतो भगवान् शंभुः कल्पे कल्पे यथा पुरा। प्रपंचाख्यां महालीलां निर्गुणोपि करोति वै ६ या कृता तेन वै लीला तां शास्त्राणि वदंति हि। पूर्वं पश्चात्कालभेदो ज्ञातुं केनापि न क्षमः ७॥ अहमप्येवमेवैतत् पृष्टवान्सद्गुरुं पुरा। ईश-कृत्य मनेर्वाच्यं प्रमाणं शास्त्रमेव नः ८ पूर्वपश्चात्कालभेदं मा पृच्छेत्याह मां गुरुः। त्रिकालाद्भुतं भविष्यं च वर्तमानमपि द्विजाः ९ वदंति सूक्ष्मं शास्त्राणि तेषु शंकां न कारयेत्। इत्येवं वादिनं सूतं प्रशस्य मुनिपुंगवाः १० सत्यमुक्तं त्वया विद्वन्नित्यूचुः सूतमस्तुवन्। रहस्यं वदनो विद्वन् गंगावाण्योः सुभाषणं ११ किमाह गंगा तत्पृच्छा वाणीं स्वागमवैभवं। शृणुध्वमिति तान्सूतः प्राह गंगावचः पुनः १२ वाणि शृणु यथाहं श्रीकेदारचरणं गता। स हि विष्णुर्यदा शंभुमाराधयितुमुद्यतः १३ महार्थीतीर्थे स्थाने बदर्याख्ये हिमभूधरे। तेनाहं प्रार्थिता आलालकनंदा महानदी १४ शीतबाधानिवृत्यर्थं तत्स्नानुष्ठानकर्मणि। अभ्यासेन केदाराराधनार्थं च सोऽव्यदा १५ तत्प्रोदकात्तदग्रेहं स्थित्वा गां पूर्वगामिनी। तथा मंदाकिनी नाम्ना केदारं सेवितुं त्वगां १६ लोके द्वारमगिरिजा तयोश्चाली सुखो यतः। कौतल्य च्यापि च तपः प्रसादाय महेशितुः १७ तया चाकारिता द्रष्टुं नवोढा शंभुना सुहं। तत्रैकांशेन गत्वाहं तां संतोष्य स्थिता तया १८ सापि सप्यैव गाहेशा हृदान्मां मणिकर्णिकां। तत्राः स्नानेन तत्प्रोदाजाताहं मणिकर्णिका १९ तत्र स्थित्वा ज्वालयाहं शाहमानुज्ञां ततः परं। भगीरथानुगामेत्य च तस्यो प्येकतामगा २० ततः कुशावर्तभूमौ गंगा द्वारेति नामतः। मायापुरीं कनखलं प्राप्य पश्चान्नृपानुगा २१ अनुशिष्टा जन्हुनापि पुत्रीत्वेन ततः परं। युवाभ्यां सह काश्यां वै वसे

अ०१५

५०

गतां वंद्यं च जनतारकं। विदेशमीतभयस्ते भूत्वं लोयं भविष्यति १०७ यथाहं नित्य शुद्धात्मा तथा त्वं नित्य निर्मला। जनानुद्धारय शुभग च्छेत्याज्ञा मदात्मसा १०८ तेनाज्ञप्ता तदाहं च चलिता नृप सत्वरां। लोकानां दृष्ट्वानं यत्र गंगोत्पत्तिः श्रुति या च भूः १०९ तत्रागमात्यो एव चतुर्धा-ह्यभवं पृथक्। नरनारायणौ भूत्वा तपो यत्राचरद्धरिः ११० श्रीमत्केदारनाथं तत्र संध्यं सेव्य संस्थितः। परमानंदकंदाख्य महालिंगं परात्परं १११ कैलासात्स्वयमागत्य हिमशैलेवरप्रदं। सद्यो मुक्तिप्रदं लिंगं दर्शनात्सर्व देहिनां ११२ रेतोदहं सतीर्थादि कोटि तीर्थैः सुसेवितं। भूभारहरणार्थाय महाविष्णु महातपाः ११३ सिद्धसाधक भावेन द्विधा भूत्वा तदाश्रमे लिंगार्चनपरो नाम्ना नरनारायणावृषी ११४ पूजयेतां त्रिकालं तौ श्रीमत्केदारनायकं। निराहारौ यतात्मानौ तन्मनस्कौ समाहितौ ११५ ग्रीष्मे पंचाग्निमध्यस्थौ वर्षास्वभ्रावकाशिनौ। निराहारौ च शरदि हेमंते जलशायिनौ ११६ किंचित्कालं फलाभक्षौ किंचिच्च तृणभक्षकौ किंचित्कालं जलाहारौ किंचिच्च पवनाशनौ ११७ किंचिच्च कण धूमादौ किंचित्कालमभक्षकौ षट्स्वप्येवं ऋतुषु तौ केदारेशं समर्चतुः ११८ एकत्पेण गिरीशाराद्धुं क्षमास्विति। द्विधा भूत्वा महाविष्णुर्नरनारायणाव्ययः ११९ अत्यत्वरमेशानं श्रीमत्केदारनायकं। सेवातुष्टेन विभुना वांछितं चापि वै हरेः १२० तदा प्रभृति लोके तदाश्रमं प्रथितं भुवि। नरनारायणावासाचिह्नवपूजाप्रभावतः १२१ लोकानां मुक्तिदं स्थानं धर्म कामार्थदं च तत। शिवदत्तवा द्विषां लोकोपकृतये करोत् १२२ इत्येवं तु सनत्कुमारमुनिना प्रोक्तं द्विजाग्र्यायतत्। शैवं दिव्यरहस्यमात्मगृहिणीं यन्नाप शुर्मोदितं १२३ प्रोक्तं मद्रुरुणा च मह्यमनघं सत्यं वेदे। ब्राह्मणायस्त्वेतत्प्रशृणोति तस्य परं शंभोः पदं स्वं गृहं १२४ इति श्रीकाशीमूलरहस्ये ब्रह्मवैवर्ते रिषिसेकाशीकेदारमाहात्म्ये चतुर्दशोऽध्यायः

१ – पाठभेद सूर्य०

प्राणामवमानिनः

देवमातापितृगुरुविप्रनित्यावमानिनः । विप्रयोनौ कुतोस्माकं जनिर्जातेति कुत्सिताः ८६ स्वधर्मं गंधमपि च जानंत: कदाचन । प्रतिग्रहं-
रताः संतुष्टमतयः क्रूरा निर्दयाः ८७ विजानुरूप[illegible]यज्ञजनसंसर्गविप्लवाः । सज्जनध्वंसिनो नित्यं द्विजाश्चांडालसंज्ञकाः ८८ एवं क्रिया-
भ्रंशिताश्च भविष्यंति कलौ द्विजाः । एवं च क्षत्रविट्शूद्रादयोपि वहुधाः कलौ ८९ दुष्कर्मनिरताः सर्वे ह्यनुलोमविलोमजाः । कुत्सि-
तक्रियश्च विलासमग्नाः कालस्य कोटिषु ९० शूद्रादयोपि मद्भक्ता न नीचा ब्राह्मणा द्विजाः । सर्ववर्णेषु ते नीचा ये ह्यभक्ता मयि प्रिये ९१
तस्मात्कलावीदृशानां त्वां विना नो धृतिः प्रिये । कलिपापयुगे राजन् विप्रास्तदनुसारिणः ९२ तेषां निंदा न कर्तव्या युगरूपा हि वै द्विजाः
अहमेव द्विजतनुर्मद्रहस्यं यतो विदुः ९३ जनास्तेनागमपुराणाश्रुतिस्मृतिगोपितं । मद्रहस्यविदो विप्रा मत्स्वरूपा[illegible] ९४ अहं विप्रतनु-
त्वेन मद्रहस्यं प्रकाशये । तस्मात्कलौ मद्रहस्यवेदिनो दुर्लभा द्विजाः ९५ श्रुतिस्मृतिपुराणागमेतिहासविदो यतः । युगत्रयेपि वहवः
कलौ नेत्रास्ति वा न वा ९६ गुरुस्तथाप्यस्ति यदि नोपदेक्ष्यति पापिनां । तस्माद्द्विजा मम तनुर्न दृष्ट्या शुभमिच्छुभिः ९७ युगत्रयेपि स्व-
र्गादिलोकाः पूर्णाः सुकर्मभिः । कलौ संभविनः पापजनैः पूर्णा भविष्या कला ९८ एवं त्वशून्याः स्वर्गादिपुण्यलोकास्त्वयानघे । व्यर्थप्र-
साधनादेव नार्यः सुकृति दुर्लभात् ९९ नोदत्वप्रसादलस्तस्मिन्नपि तास्त्वत्प्रसादतः । चातुर्वर्ण्याः संकराश्च नीचास्त्वद्वल्लभाः १०० महा-
पापयुताश्चापि मुक्तास्त्वदवगाहनात् । त्वदंबुकणिकापानान्मुच्यंते तव दर्शनात् १०१ किं पुनस्त्वत्तटे वसतां तेषां मुक्तिः करे स्थिता । तनु-
त्यजां तव तटे मत्साम्यं ध्रुवं प्रिये १०२ गच्छ प्रियेति आदेशमनुग्राह्य पाः शिवः । लोकोपकृतये शुद्धिकाम्या मा सेव्य सादरं १०३ तदाहं
भर्त्रनुज्ञाता याकार्यं विहीनोत्तमापि । मिलिता पल्वलाकुल्या [illegible] सुदरि १०४ त्वन्नाम[illegible]मेवेत मत्सयुक्ता [illegible] । इत्याज्ञां
शिरसा गृह्य प्रयाताहं नृपानुगा १०५ तदा मामाह भगवान् शृणु देव्यपरं वरं । न पर्युषितं दुष्टं वा न दौर्गंध्यं न वालयः १०६ न स्पर्शं दुष्टं

अ०१४ ४६

१-२-३-४ पाठभेद - सूर्य०

वस्त्रै रत्नैश्च भूषणैर्गजवाजिरथादिभिः। ततो मामाह भगवान्लोकोद्धारहेतवे ४३ त्वं सप्तधा नदी भूत्वा धाराभिः पद्मिनीसुता। पश्चात्पूर्वोदधिं गच्छति सप्तभिस्ति सप्तभिस्त्विह ४४ तत्र तत्र स्वर्गगत प्राणिलोकान्संपावयन्मुदा। एकया धारया गच्छ भगीरथ रथानुगा ४५ मद्भक्तो जन्हुनामास्ति शिवज्ञानी महामुनिः। तेन त्वं शोषिता तस्य कन्या भूत्वा गता व्रज ४६ मदागसो निवृत्तिं ते समुद्रोपि प्रदास्यति। मद्देह स्थापि दृष्टा सम दागो विनिवृत्तये ४७ तेनोपदिष्टा मत्क्षेत्रं गच्छ गाङ्गं मणिकर्णिकां तत्र केदारनाथो हं लिंगलिंग रूपो वसामि हि ४८ तत्र म-त्सेवया गौरीं तीर्थस्य च निषेवणात् भूत्वा निरागसी पश्चाद्विश्वेशं मणिकर्णिकां ४९ सेव्य विश्वेश पादाब्जं तत्र त्वं सकलावस। स्तोकांशेनोदधिं गच्छ पितॄन्स्तारय भूपतेः ५० त्रेतायुगे द्वापराख्ये कलौ चाग्रे भविष्यति पुनः कृतस्ते तिष्ठे त्वां विना नोद्धरेत्प्रजाः ५१ कृतत्रेताद्वापरेषु धर्मो द्वि त्रि चतुष्पदः। जनेतिष्ठति भूभागे भारतवर्षसंज्ञके ५२ कृते युगे सर्वजना धर्मेणागतिमाप्नुवन्। धर्मन्यून त्या त्रेता द्वापरे जनतां तदा ५३ त्वत्सेवनाच्च मुच्यंते कर्मबंधात्स्वकर्मतः। संप्राप्ते च कलौ लोकाः कर्मभ्रष्टा भवंति धियः ५४ भविष्यं-त्युग्रपापिष्ठाश्च चातुर्वर्ण्या अपि प्रिये। वर्णसांकर्यमापन्ना वेदविप्रविदूषकाः ५५ नीचा भविष्यंति वरा नीचा भवंति हि। दस्यवश्चैव-राजानः म्लेच्छचांडालपुल्कसाः ५६ प्रजाद्रोह परा नित्यं परस्त्रीधर्षकाबलात्। परद्रव्यापहर्त्तारः छलादोग्रयात्प्रतारणात् ५७ राजा-नुरूपाश्च जना धर्मभ्रष्टाः स्वधर्मतः। वर्णाश्रमव्यवस्थापि लुप्यते स्वोदरंभौः ५८ धर्मलिंगप्रतिच्छन्नैः शिश्नोदरपरायणैः। एकपादोपि लुप्येत धर्मस्य विकृतैर्जनैः ५९ कलौ भार्या गिरो वेदाः स्वकुक्षिभरणं क्रतुः। यथेच्छ चिंतितं मानं श्रेष्ठशास्त्रमशास्त्रकं ६० अमार्गश्चोत्तमो मार्ग उक्तधर्मोप्यधर्मकः। प्राचीन शास्त्रमुच्छिद्य कुर्वंति च नवं नवं ६१ कुबुद्धयः शास्त्रगंधदुर्विदग्धातिगर्विताः। दुःशास्त्रबोधकामू-ढान्मूढाः पंडितमानिनः ६२ चातुर्वर्ण्यं नीचबुद्ध्या वर्णसांकर्यमाप्नुयात्। चातुर्वर्ण्ये मत्स्वरूप ज्ञानिनस्त्वति दुर्लभाः ६३ श्रुतिस्मृतिपुराणा-

अ०१४

४८

मोदितं मद्रहस्यकं। न जानंत्येव धी मूढा वराका: स्वल्पबुद्धय: ६४ भवंति विप्रा वृषाधा कर्मणां दु: क्रियावशात्। तथैव क्षत्रियावैश्या: श्रुतिचोदितकर्मण: ६५ तेषां भेदं युगभेदात्प्रवक्ष्यामि शृणु प्रिये। देवर्षि द्विज राजन्य वैश्य शूद्र विडालका: ६६ पशु म्लेच्छाश्च चांडाला विप्रा दशविधा: क्रमा:। देवर्षि द्विज राजन्या: चतुर्भेदा युगत्रये ६७॥ शेषभेदाश्च कृत्येन भविष्यंति कलौ युगे। षट्कर्म निरता नित्यमष्टांग युत योगिन: ६८ तत्वेन मद्रहस्यज्ञा देवविप्रा इति स्मृता:। षट्कर्मिणो योगयुक्ता मां यज्ञेन यजंते ये ६९ श्रुत्यागमोक्त मार्गेण ऋषि विप्रा इतीरिता:। षट्कर्मिणो मदर्चायां श्रद्धावंतो मदागमे ७० वैदिकोक्त विधानेन [illegible] केवलं द्विज संज्ञका:। कृते युगे च त्रेतायां मादृशा बहवो द्विजा: ७१ शास्त्रास्त्र धारिणो विप्रा मदर्चा विधिवेदिन:। राजन्य विप्रा अपि च भवंति द्वापरे युगे ७२ वैश्य कृत्यादि भेदेन शूद्रा षड्भेदिनो द्विजा:। भविष्यंति कलौ देव कर्म भ्रष्टा कुबुद्धय: ७३ कृषि गोरक्ष वाणिज्य वृत्तयो वैश्य संज्ञका:। श्रद्धाविहीना: सत्कृत्ये शूद्र नीचादि सेवया ७४ नियमाचार रहिता: केवलं स्वार्थकामुका:। अनिष्ट पितृ देवार्चा द्विजास्ते शूद्र संज्ञका: ७५ परभ्रामकशास्त्रोपदेष्टारो तिभ्रामका:। इन्मील्य नेत्रे शनैर्विडालो भक्षते यथा ७६ दंभार्थं कर्मिणा इति ज्ञानिनो धर्मभत्तीय। अंत: श्रद्धा विहीनाश्च धनस्वार्थैक लिप्सव: ७७ मौनव्याजा: सर्वभक्षा: कथितो विडालका:। धर्माधर्मौ पुण्य पापं कृत्वा कृत्ये स्वकर्मणि ७८ नैव जानंति देवर्षि पितृ मातृ गुरूनपि। येन केनापि कृत्येन केवलं स्वोदरंभरा: ७९ केवलं विप्रसंज्ञार्थं कुहर्ष्य तन्तु धारिणा:।[1] विप्रोक्त संस्कार हीना: पशु विप्रा: प्रकीर्तिता: ८० जनित्वा विप्रवंशेषु म्लेच्छ कृत्य कृत प्रिया:। स्मश्रु लम्बेति संसक्तौ मद्य मांसादि भक्षणे ८१ सर्व नारी संगमे च शुचि कृत्य विनिंदका:। देवर्षि पितृ देवोक्त शास्त्र श्रद्धा विहीनका: ८२ निर्दया: प्राणि हिंसायां कुलीनो संगमेच्छव:। विप्रश्रुव: पामरास्ते दुर्धियो म्लेच्छ संज्ञका: ८३ हिंसा कर्म रता नित्यं नीच सेवन तत्पर:। स्वकर्म लेशमपि च न कुर्वंति कदाचन ८४ आचांडालादि दुर्योनि स्त्री मात्र कृत संगिन:। मद्य मांसादि दुर्द्रव्य भक्ष्याभक्ष्य विचारिणा: ८५॥

[1] (केवलं विप्रसंज्ञार्थं कुहर्यं तन्तु धारिण:)

१- कोष्ठान्तर्गतपद लक्ष्मण० अधिकारे

47

तस्मात्त्विदं न मुंचामीत्येवं चिंत्याह मन्वहं। शिवैक चित्ता नितरां कृपासां कांतं तदा २३ पुनर्भगीरथेनैवं भूपात्पुत्रेण प्रार्थितवांस्तदा। उद्धा-
रणाय पितॄणां तदा मामवदत्प्रभुः २४ विसृजामि भुवं गच्छ गंगे त्वां भक्त कारणात। उद्धारय पितॄंस्तस्य सिंधुं व्रजमराज्ञया २५ एवं वदंतं
सर्वेषां प्रसिपत्य पुनः पुनः। मा मुंच मां शरणागतां त्वत्कृतेकृतागसं २६ अज्ञानात्स्त्रीस्वभावान्मा मेषिदं चापलात्प्रभुं। यदि मां मुंचासि भवान्
भक्तार्थं प्रार्थितः चिरं २७ भीतां मां सत्यवाक्येन समाधाय ददां कहे। येन मे हृदंतु शंका त्वद्वियोगान्न भीतिदा २८ भवेत्तया कृपया विभो
८थ द्रागमृतसेचनात्। इति मां भीतभीतां सः पुनः प्राह हसन्विभुः २९ गंगे त्वां सर्वभावेन न मुंचामि स्थिरा भव। भक्तार्थं किंचिदेव त्वं जलांशे
न भुवं व्रज ३० तत्र त्वां हिमवत्कन्या व्याजेन गिरिजा मुदे। गिरिजा भगिनी प्रीत्या मामेव त्वां परिणायेत ३१ तदाहं गिरिजा पु-
त्र्या प्रीत्या नीय पुनर्भवां। गतापराधदोषां त्वां तदा मयि विधास्ये ३२ पश्य गौरी पितुर्देषाद्धि सृष्टांगा दिपावके। पुनर्गिरेः सुताभूत्वा मामाप
मम भीकृतः ३३ यद्वत् संस्कारितां त्वां वै गृह्णामि त्वां कृतागसां। मयि को पंचतां कुर्यात्त्वां निर्वाणं करोति च ३४ तस्मात्त्वं निर्भया गच्छ
मम प्रीतिस्त्वयि स्थिरा। अंतःकरणतः प्रीतिः पत्न्या मत्ति प्रियत्व चेत ३५ तस्याश्चिंता कास्ति लोके सपत्न्या वान्यतोऽपि वा। गौरी मर्धांगतो
धास्ये त्वां धारये शिरसा प्रियां ३६ तस्मान्मा कुरु चित्ते त्वं भयवृद्धिं च मत्कृते। इति भक्ताभीष्टदो मां समाधाय जटां तदा ३७ किंची
दुत्सर्जन व्याजात् गौरी प्रीत्यै हिमालये। सुतां कृत्वा हिमगिरेर्मां बिंदुसरसि क्षिपत् ३८ तदा सर्व हृदं तस्यो देवी हिमगिरेर्हरिः। प्रविश्य ते
न मां पत्न्या ग्राहयत्स्वात्मजा धिया ३९ गिरिजापि तदा प्रीत्या स्वसृभावं चकार मां। ततो मां पितरौ प्रार्थ्य स्वात्मवन्मामदापयत् ४० दो
पुनर्विवाह विधिना निजनाथाय शंभवे। ब्रह्म विष्णुमुखा देवाः सर्वे याता तदुत्सवे ४१ तान्यथार्हेण हिमवान् विधि
वत्समपूजयत् ॥ ब्रह्मर्षीन्शंभुगणान्नन्नं धादीश्च सुतावपि ॥ ४२ ॥

तदाहं गिरिजा त्वां च प्रणीय पुनर्भवाम्
गतापराधदोषां त्वां तदा मयि विधास्ये
तदाहं गिरिजा त्वां च पणीय पुनर्भवाम्
गतापराधदोषां त्वां
पश्य गौरी पितुर्दोषाद् विसृष्टांगा दि पावके।

श्रुत्वा गंगा कथां पश्चात्किमाह च सरस्वती । कथं काशीं समायाता नद्यस्तिस्रोऽपि मिलिता: २ प्रयागं तीर्थराजानं कृत्वा काशीं सुसेवितुं ॥ प्राचीनमतिर्गा कण्यांता: कथं मुक्ता: शिवागत: ३ तत्सर्वं श्रोतुमिच्छामस्त्वत्तो ब्रह्मविदांवर । इतिदृष्टस्तदा सूतो मुनिभिस्तत्ववादिभि: ४ तदा तानाह धैर्यस्ततो रहस्यं तत्पुरातनं । सूत० श्रृणुध्वं ऋषय: सर्वे त्विममेव पुरा सती । अनवद्यास्वात्मनाथ प्रश्नं पप्रच्छ सादरं पुनाथशर्मा वामदेवमुनये ऋषिरोदितं । सनत्कुमारेण गुह्यं तन्माम्याह च मद्गुरु: ६ सनत्कुमारं पप्रच्छ वामदेव: पुरातनं । रहस्यं लोकानां तारकं शंभुर्भक्तिद ७ वामदेव० स्कंदांश विद्वन्ब्रह्मर्षे किमाह शिवदापगा । स्वात्तस्य महेशानपरीणीता पगा कथं ८ तदाह गंगा संवादं वाणी यमुनयोर्द्विज । गंगोवाच श्रृणु वाणि प्रवक्ष्यामि मत्पाणि ग्रहणं पुरा । कृतं शिवेन भक्तानां सर्वसिद्धि प्रदायिने ९ पूर्वमेव पराशक्तेरंशां मां शिरसा दधत् । विरिंचेन पुनर्देवै गृहीतां स्वस्वकास्य... स्वर्लोकस्थां ददौ ब्रह्मा भगीरथनृपाय मां । पितृणां तारणार्थाय तदाहं गर्विताभृशं ११ नृपप्रोक्त्ये शिवो धर्तुं मामंगीकृतवान्यदा । तदाहं गर्विता शंभुं नयामीति रसातलं १२ अपतं शंभुशिरसि सर्ववेगेन दर्भरा । अज्ञात्वा शिवमाहात्म्यं स्त्रीचापल्याच्च गर्विता १३ शिवं निरादृतीकृत्य दुर्बुध्या पतितां च मां । जटागह्वरकांतारे लीनाह विद्रुवत्तदा १४ अलब्धनिर्गमा सर्वप्रयत्नेनापि दुर्बला । तदाहं तपसा देवं चिरेणापरितोषयं १५ जटागह्वरलीनापि मनसा सर्वभावत: । तदा प्रसन्नो भगवान्वांछितं ते वदेति किं १६ तदाहं वरदं नत्वा वरदं नाथो भवेति मे । तदा मां भगवानाह इत्सन्न कुर्हि चापलं १७ त्वं मच्छक्त्यंशभूतैव पूर्वमेव धृता मया । तथापि वेधसे दत्ता प्रसाद मिति सृष्टये १८ तत्कुंडिकास्थादेवैस्त्वं प्राप्ता तेषां विभूतये । मन्मायामोहितानां त्वं सहवासाद्विवोकसां १९ अज्ञानमोहिता जाता मांनजानासि गर्वत: । तदज्ञाननिवृत्यर्थं हिमवद्दुहिता भव २० उमा त्वां भगिनीं भाव्य त्वदज्ञानं व्यपोह्य च । आत्मांशामात्मवत्ता मां त्वां प्रापयति मे यत: २१ इति देववच: श्रुत्वा तदाहं थकिता भृशं । मयि देवस्य कोपोस्ति तेन मां त्यक्तुमिच्छति २२

१-२-पाठभेद सूर्य० ३-कोष्ठान्तर्गत वाक्य सूर्य० अधिक है

सुरापगे। श्रीमत्केदारं विधुमाद्यादीन्प्रणम्य च भक्तितः ९९ मणिकर्णी द्वयं सेव्य सागरं यात्यमो द्भुतः। एवं सरस्वती गंगा संवादं लोकपावनं ९८ सनत्कुमारो भगवान्व्यासदेवाय चाब्रवीत्। तमेव नाथशर्मापि स्वपत्नीं प्राह चादरात् ९९ तमेव मद्गुरुर्मह्यं प्रत्याह काहरिणीकोत्तमः। शृणुत मुनिवरेन्द्राः स्वर्धुनी ब्रह्मपत्न्यो विषदनमखिलाघध्वंसवह्नेः कदोक्षं। सकृदपि मनुजो यः कर्णपीयूषतारं पिबति शिवपदाब्जं भुक्तभोगः प्रयाति १०० सद्यः सर्वमघौघहं कलिमलप्रोद्दामशैलाशनिं। लोकानुग्रहकारकं सुचरितं सारस्वतं स्वर्गदं १०१ निष्कामाश्च विमोक्षदं सकृदपि शृण्वन्ति ये सादरं। ते यान्ति त्रिदशैरगम्यमपि यच्छांमैश्वरं निर्भयं १०२ किं वैतेन पीडा मेरावहुना कृच्छ्रादि चान्द्रायणाद्यैर्जन्मार्जितकायशोषणतपः क्लेशेन वा भूसुराः १०३ श्रीकाशी मणिकर्णिका सुरनदी विश्वेश्वरा दुर्लभा। पुंसां पूर्वतपः प्रभावनिचयात् प्राप्यन्ति नान्यथा १०४ तत्राप्युत्तमपुण्यदाखिलशिवाद्यानां निहंत्री नृणां। प्रोक्ता मणिकर्णिका शुभकरी केदारनाथस्तथा १०५ काश्यां भैरवयातनास्त्यघकृतां तद्वन्नास्त्यन्यथा। तत्रापि सदयावशात परिहृतां केदारसंज्ञाभितः १०६ पश्यध्वं मणिकर्णिकां चिरतरां केदारलिंगं जनाः। गाहध्वं मणिकर्णिका शुभजले व्यर्चयध्वं मीशं मुदा १०७ प्राप्यध्वं भुवि भुक्तिमंतसमये मुक्तिं सुरैर्दुर्लभामित्युद्दामसुवाक्यभैरवविभोः केदार एवास्त्यहो १०८॥ इति श्रीकाशीमूलरहस्ये ब्रह्मवैवर्ते खिले काश्यां केदारमाहात्म्ये त्रयोदशोऽध्यायः १३

ऋषय ऊ० सूत सर्वज्ञाननिधे सारस्वत्या महाकथा। श्रुतास्माभिः प्रकृष्टाघध्वंसिनी जनपावनी १॥

भवताद्द्वय फलदाः सद्यः फलनिवृत्तये। एवमाज्ञा विधेर्जाता यूयं मत्प्रीतये स्थिताः ७७ कृतोपकारा यूयं मे स्वर्गं गच्छत सद्गुरा।
एवमुक्त्वा ततो देवा हृमतार्धि मगमतत ७८ हविर्यज्ञे गृहीतं वै विप्रा देवान्समाह्वयन्। प्रत्यक्षतस्त्व नायातान् दृष्ट्वा देवांस्तदा द्विजाः ७९
सद्य फल प्रार्थनया विरमन्यज्ञ कर्मसु। कान्यकुब्ज गताः केचिदन्ये देशेषु केचन ८० केचिच्च मुनयस्तत्र मामाश्रित्य तपस्विनः। सद्यः
फलद शक्त्यात्मापि गुप्तां केवल ब्राह्मणीं ८१ सारस्वताभिधा जाता मत्तीरे प्रीते द्विजाः। कान्यकुब्ज स्थिता विप्राः कान्यकुब्जाभिधाभव-
न् ८२ मिथिला देशमायाता मैथिलाख्या भवन्द्विजाः। औत्कलं देशमायाता औत्कलाख्या भवन्द्विजाः ८३ गुडाभिधानो राजर्षि विन्ध्यो-
त्तर भुवां पतिः। बली कदाचिद्भवत्तेन क्रांतं भुवः स्थलं ८४ गुडदेशे स्थिता विप्रा गौडाख्यां लेभिरे ततः। सर्वदेशा गुडाक्रांतास्तदा
सर्वे पि गौडतां ८५ प्राप्ताः पंचापि भेदेन सर्वे ब्रह्म विदांवराः। सारस्वताः कान्यकुब्ज गौडा उत्कल मैथिलाः। एते पंच महागौडा विंध्य
स्योत्तर वासिनः। विंध्यस्य दक्षिणे भाग गताः केचिद् द्विजोत्तमाः ८७ गुर्जरे च महाराष्ट्रे चांध्रे कार्णाट देशके। दक्षिणाब्धेः समीपे च
पांड्य चोलादि देशके ८८ तत्तद्देशे स्थिता विप्राः सर्वे ब्रह्म विदां वराः। पांड्य देशे पुरा चाभूद् द्राविडो नाम भूपतिः। ८९ धर्मात्मा प्रतापेन
विंध्य दक्षिण भूमिका। आक्रांता तेन सर्वापि स राजाति प्रतापवान् ९० तस्य देश स्थिता विप्रा द्राविडाख्यां च लेभिरे। कार्णाटा
द्राविडा श्चांध्रा महाराष्ट्राश्च गुर्जराः ९१ पंच द्राविड संज्ञाश्च विंध्य दक्षिण वासिनः। एवं च भारतं वर्षं व्याप्तं विप्रवरैस्तदा ९२
सर्वे वेदविदः प्राज्ञाः सर्वे ब्रह्मविदां वराः। मत्तो राज्य कुरुक्षेत्रात् प्रसृताः क्षिति मंडले ९३ तदाप्यस्य महादेवि त्वदागमन कांक्षया।
स्मरन्ब्रह्म वचः स्वित्ते स्थिता त्वत्संगमोत्सुका ९४ इदानीं भाग्यतो मे त्वमागता लोक पावनी इयं च यमुना हं च कृतार्थं तव संगतः ९५
त्वं मुक्तिदा स्वर्गदा आवांति त्वं च संगताः। तस्मात् त्रस्वर्ग मोक्षौ कारश्चौ प्राणिनां भुवि ९६ आवां काशीं गमिष्याव स्त्वया साकं

पुण्यक्षयात्कर्मभूमौ पुण्यकृतः स्वल्पा एव भवंति हि। पापिनो बहवः संति भास्करो लोकगामिनः ६२ काम्यपुण्यकृतो यांति स्थानेष्वे

तेषु वै जनाः। निष्कामपुण्याः मे लोकं विष्णोर्वा शूलिनोपि वा ६३ एतेषु पुण्यस्थानेषु बह्व्यः संत्येव योषितः। तासां पुण्यकृतः कुत्र

लभंते पश्यताधुना ६४ एतासु भोगनारीषु कस्याः कस्याश्च पुण्यतः। एकैकोलभ्यते शिष्टस्त्वभुक्ता एव पूरुषैः ६५ आर्यावर्त्तः कर्मभु

मौ केवलः स्वर्गदायकः। तत्रापि च कुरुक्षेत्रं पुण्यक्षेत्रं नृणां दिवे ६६ मोक्षदा सप्तपुर्यश्च तासां काशी विशिष्यते। बहूनि शिवधा-

मानि मुक्तिदानि च संति हि ६७ पुरीषु बद्धसु मरणं काशीमरणादं नृणां। षट्पु काम्यपुण्यं वै जनास्तप म होलभन् ६८ काश्यां तु

काम्यपुण्यं वै मल्लोके विश्रुते हरः। काश्यां विसृष्टदेहाये संपुज्यंते शिवेन ते ६९ स्वर्गांगाभुगता च स्यात् काम्यपुण्योपि

भूतले। काम्यं नृणां कृत्य लोकान्मुक्तानेव करोति हि ७० तदा स्वर्लोकगाः स्वल्पाः काम्यपुण्या भवंति हि। केवलं स्वर्गगलयः

कृतपुण्याः कुतो जनाः ७१ तत्रापि वाराणसीतीरस्थं पुण्यं सद्यः फलप्रदं। इति ज्ञात्वाह मेताभिस्तेरोभिः कृतार्थनः ७२ चिरभोग

वियुक्ताभिस्त्वर्गिरागो बहवः कृताः। सारस्वत्यै वरं दत्त्वा सद्यः प्राप्स्यै नृणां दिवि ७३ तस्मादस्मात्तां तृप्त्यै मयैव कृतमादरात्। इतः

परं भवन्नाथानानयिष्यामि वांतिकं ७४ गच्छतेत्य वदत्यतो दैवानां प्रेषयत्स्वभूः। ततो मामाह मे भर्त्ता स्वस्व

धाम्नि दिवौकसः ७५ प्रेषयेतितरा हंतान्प्रेरयत्स्वस्वधाम्नि। पुण्यमल्पत्वक्षतः सद्यः फलं प्राप्तात्र वै जनाः ७६॥

वसुरुद्रमरुत्पत्न्यो या हविर्भागि योषितः। अप्सरासश्चुः स्वर्दःस्वं यांति विरूपेण कामतां ४१ तास्तदा सत्यपातं प्राह समाधाय हसन्व-
चः। देवस्त्रियः शृणुत भोः स्वर्गगा याश्च भूतले ४२ अपतातो विप्राकृ या ज्ञातया संगो भवेत्तया। सद्यः फलप्रदा शक्तिस्तया गच्छति तत्क्रमः ४३
ततो विप्रास्तन्निराशा द्यान्यांति यथायथं॥ हविर्भक्ष्यतातस्तत्र मत्तायात्यातेके दिवः ४४ युष्मन्नाथा लब्ध्वा यूयं पतिव्रत्येन मोदत। पतिव्रता-
नामन्य भोगेच्छा नैव कारयेत् ४५ क्षणा भोगाश्च ताः स्मो युष्माकं तासु न कुर्वत। कदाचित्पुण्ययोगेन यावद्भक्ता तां रतिः ४६ नो चेत्पुण्य
दौर्भाग्यं तासामस्त्येव सर्वदा। युष्मं तु पुण्यबहुला महिष्यश्च दिवौकसां ४७ पुनः पतिव्रताश्रेष्ठ यावत्कल्पं सुरालयाः। तस्मात्स्वधेन गच्छध्वं
मोदत स्व स्व भर्तृभिः ४८ अनेककोटयस्तास्ते दिव्याः सपत्नीवार्तिकाः। त्रिंशत्त्रिकोटयो हि देवास्तेपि पत्नीयुताः ४९ गीतवादित्रनृत्याद्यैः कृ- पृथक्
ता देवमुदे मया। येषामेव यद्देवानां रतिः सुभोक्तारश्चताः स्त्रियः ५० बहुपुण्यकृतो भूमेरागमिष्यंति चेद्यदि। सत्कर्मणा प्राप्तदेवभावानां
भोगदाश्च ताः ५१ भूमिर्विस्तारतः कृत्स्ना पंचाशत्कोटियोजना। द्वीपखंडविभागेन भेदिता भोगभूमिका ५२ तस्यां वै कर्मभूः कृत्स्ना
नव साहस्र योजना भारतं वर्षमित्यतः स्वल्पा कर्मफलप्रदा ५३ तस्यामपि वरा पुण्यफलदात्री क्वचित्त्वभूः। आर्यावर्तेति नीता ह्रक फल-
दाशेष भूमिका ५४ कर्मभूमौ पुण्यकृतां भोगाय सकलं जगत्। अन्य पुण्यकृतां भोगभूमयस्तासु तस्यतः ५५ भूः स्वर्गा बहवः संति तथा
पातालभूमयः। इलावृतादिखंडाश्च जंबूद्वीपगताः पराः ५६ प्लक्षादिद्वीपमध्यस्था धरामेरु मुखाद्रयः। लोकालोकाचलभवः सप्त पातालभू-
मयः ५७ एते स्थानमुख्येषु स्वेष्टभोगसमृद्धिषु। स्त्रियो ह्यसंख्या भोगिन्यः संति तौर्द्यं यौवनाः ५८ पातालेष्वपि पौंश्चल्यः स्वैरिण्यः कामि-
नो मुखाः। बह्व्यः संति तथा ह्यर्वाक्प्राप्ता भ्रमुखा वा ५९ एतेषु भोगस्थानेषु कर्मभूमिगता जनाः। प्रायस्य तारतम्येन भोक्ष्यंति सुखमुत्तमं ६०
पुण्यक्षयात्कर्मभूमौ जनिष्यंति पुनः पुनः। भोगमात्रं भोगभूमौ न फलं तत्र कर्मणां ॥ ६१ ॥

१-२-३-पाठभेद सूर्य०

शिशापुत्रो पिभूर्लोके देहं तृणमिव त्यजन्। सद्यः फलप्रदवलात् वालवृद्ध युवादयः २३ सर्वे स्वर्गं पक्वभोगं वांछया प्राप्तिनो मिताः। तदा-
देवस्त्रियो दैवैर्विधुला शिवाकालतः २४ मर्त्त्यैर्विप्रयज्ञेषु भागाहूते निरंतरं। म्लानपुष्प सुगंधश्रीर्छिन्न कुसुमाशिव २५
म्लानवस्त्र सुभूषा स्रग्गंध कस्तूरि कुंकुमाः। कामार्त्यसह विच्छाय पांडुनेत्र कपोलकाः २६ मार्गं प्रतीक्ष भर्तृणां तैः संगो नः क-
दाभवेत। कथं सात्वता भूमौ नः प्रभुः सौरदायये २७ यन्मोहिप्राय भर्तृणां विरामो न क्षमां त्वहो। सद्यःफल प्राप्ति लोभाद्यज्ञेन
विरामोन्नृभिः २८ पिशाचभूतगंधर्व स्वर्गाष्टाशेव भूस्थलं। महर्जनस्तपोलोकमपि मध्यांतरालकं २९ भूमौ तारस्वतं क्षेत्र कृत
पुण्यैः सुपूरितं। भुञ्जंते चाप्सरास्तैस्तैः स्व स्व भाग्यानुसारतः ३० प्राप्याप्सरसः सर्वाश्चास्मान्भर्तॄन्ययाचिरे। एकरात्रापि देहि
भर्त्तारं तेतिनिःस्पृशः ३१ तदा कदापि भर्त्ता मां नो दास्यामि वा नवा। तदा प्रासासु गच्छंति कृताज्ञा चकराश्च के ३२ एवमप्यप्सरसादि
मुख्यानामेव मे रतिः। इतराभिव जानंति रतिसौख्यं नृ दुर्लभात् ३३ पुण्यात्क्षेमरागताश्चैव मुख्यानामेव ते धवाः। रतिभोग विहीना-
नां प्राकृताप्सरसामपि ३४ एकस्याः पंच पतयः स्तृप्तिं कुर्वंति भोगतः। अस्माकं दुर्दशा चैव मागता त्वय भावतः ३५ पश्यत प्राकृ-
ताप्सरसः न हसंति स्वमदा स्त्रियः। सर्वं च तहि तु योग्यं स्त्रियाः दुखं निरंतरं ३६ अन्य स्त्रिया सुखवतिं या हेलनं मरणाधिकं।
नयांत्य स्मन्नायकाः यथा वक्षाणि न हि भुवि ३७ सद्यः फलप्रदाक्षिप्रा विसंति नैवे क्रतोः। तस्मादनाथाः किं त्वत्र वसामो व्य-
र्थ चिंतया ३८ व्यर्थवस्त्र विभूषा स्रग्गंध कस्तूरि कुंकुमाः। गच्छाम ब्रह्म सदन मस्मद्दुःखं निवेदितुं ३९ इति कृत्वा मतिं
देवस्त्रियो याता श्चतुर्मुखं॥ शचीमुख्याष्ट दिक्पाल पत्न्यो गंधर्व योषितः॥४०॥

पुण्यै

ग. पुरिवतया

१-२-३-४ - पाठभेद सूर्य० ४क - पाठभेद लक्ष्मण०

सरस्वत्याः प्रभावो वा कीदृशः सर्वतोषकृत्। ततो (ततः) सरस्वती गंगां किमाह स्वात्मवैभवं ४ तत्सर्वं विस्तरेणाद्य वद ज्ञानविदांवर।
इति पृष्टस्तदा सूतः प्राह तान्मुनिपुंगवान् ५ सूत० शृणुध्वमृषयः सर्वे गंगां वाणी तदावदत्। गंगे शृणु जगद्वंद्ये पूर्वं मामाहवै
कारः ६ परमात्मया सह तदा दास्यामीति वरं ददौ। त्वं नदीनां परा मुक्तेः भूमौ वर्द्ध हितार्थिनी ७ त्वत्तीरे यत्फलं प्राप्यं जना देवान्य
जंति हि। तेषां सद्यः फलप्राप्तिर्भवत्वदाम दाज्ञया ८ इति लब्धवराहं तदाज्ञया चात्मभुवि। तथैव मां वरं दत्त्वाभवदागमनावधि ९
[1. पुण्यप्राप्त्या]
तदाहं च कुरुक्षेत्रं पुण्यसाध्या भवं नदी। एकांशेन ततः सर्वभागेनास्तं विधेर्मुखे १० मत्तीरे सद्यः फलदं वृत्तांतं नारदो मुनिः लोके
प्रचारयामास ततो लोकास्तथा चरन् ११ देवलोके व्यवसायो ब्रह्माणं प्रार्थयंस्तदा। विपुलभोगाः पुंभिस्ताधात्रावाभवन् १२
कृतं । तस्मात्प्राचीनतीर्थे यं [illegible] काशी शिवाघहृत् १९ श्रीमत्केदारनाथोपि तथैव स्वेन संहरः । तत्रापि स्वस्य पीठे ते भूमौ चांतर्गृहावधि २० निवारिता यातनाभिभैरवी काशि भूतले । तस्मात्केदार-
महिमा काश्या मत्यद्भुतो मुने २१ श्रीमाङ्गृवाधिनाथस्य कृपानैकविचित्रता । शिवेवा शिवभक्ते वा काश्यां वा दूषणं कृतं २२ तत्पापमुक्तिं केदार गौरीतीर्थे भवेद्ध्रुवं । मतंवं स्वेनचेत्कल्पा भुवेर्भो-
गेन मुच्यते २३ एतद्रहस्यं देवेन देव्यै प्रकटितं मुने । एतज्ज्ञात्वा भक्तिपूर्वं मुच्यंते पामरा अपि २४ तस्मात्केदारनाथस्य काश्यां सेवा सुदुर्लभा । चुलुकोदकफलपुष्पमात्रैर्यैः सुसमर्पितं २५ तेरेवाऽनर्गा-
ला जाता मुक्तिद्वारकवाटिका । श्रीमत्केदारनिकटे दीप एकः समर्पितः २६ ज्ञानदीपस्तस्य हृदि गुरुवाचा प्रकाशते । श्रीमत्केदारनाथाग्रे धूपं तैर्गाधकृच्चयः २७ वासना कर्मसंबंध पूर्वं तस्य न-
श्यत्यनादिमान । श्रीमत्केदारनाथस्य नैवेद्यं येन केनचित् २८ कोटिभोज्यदत्तं तत एव शिवे वंदिता श्रीमत्केदारनाथस्य तांबूलं वा निवेदयेत् २९ आमूलं तस्य दुष्कर्ममूलं पापं विनश्यति । श्री-
मत्केदारनाथस्य मंत्रपुष्पं समर्चति ३० आमंत्रितः समोक्षाय शिवेनाहं न संशयः । नीराजनविधिं श्रीमत्केदारे यः समाचरेत् ३१ नीराजितो मोक्षलक्ष्म्या स प्रेम्णात्र संशयः । छत्रचामरराजोपचारादिभि-
रुमापतिं ३२ यो रुद्रकन्यासंघानां सेवापात्रं स सेवाते । नृत्यगीतादिराजोपचारैः केदारमर्चति ३३ मोक्षलक्ष्मी नर्तनस्य स पात्रं नात्र संशयः । रुद्रैर्महाभिषेकान्तमंत्रैः समभिषेक्ष्यति ३४ मोक्षसाम्राज्य-
लक्ष्म्यै च सोभिषिक्तो न संशयः । यो महापूजया रात्रौ केदारेशं समर्चति ३५ स महादिद्धः शिवगणो महापूज्यः शिवांतिके । यः केदारालये खंड [illegible] अध्यक्रोच्चवं ३६ स चंद्रखंडमौलिः स्यादपरश्चंद्रमौलिनः । मोक्षं
स्वल्पं जलं वात्र केदारेऽभिषेकमेव दिशेत् ३७ सोऽनल्पशंकरस्यामृतसिंधौ निमज्जति । बहुनात्र किमुक्तेन वामदेव मुने शृणु ३८ पत्रपुष्पफलतोयनिवेद्य धूपदीपमुखवासनकाद्यैः । चंदनाक्षतफलादिविशेषैर्येन केन विधि-

१. श्रू तेनावाप्तमपुनर्भवधाम संकल्प मिव तत्र निविदा

नापि सकृद्वार्द्र पूजनं यदि लभेदिह केदारेशलिंगवपुषे मनुजस्य तेन चाप्रमः पुनर्भवधामशंकास्य न हि तत्र विवक्षा ४० रुद्रसारमयं महोपनिषदां सिद्धांतसारामृतं देवानामपि दुर्लभं त्रिजगतां मुद्गुरुणो दीक्षितं ४१
स्वल्पेनापि च पूजनेन पुनरावृत्तिं विनाशो स्तदं। श्रीकाशीनगरी विभूषणमिदं केदारलिंगं परं ४२ विश्वेशस्त्रिपुरांतकः पशुपतिः केदारलिंगात्मना पाशांश्चैव पशोः पति छिन्नति यस्तो भवद्गुच्छ्याज्जनान ४३ धु-
र्दूर्तं गुहभावमेत्य जनतां संबोधयंतेतरां। स्वस्मिन्धामनि भूप्रदेशपीतः सत्तारकोदेशकृत ४४ श्रीकाशी च विमुक्तिदाखिलजनाधारा हि योगा प्रियः। सद्रूपानितरां तथापि जनता श्रीभैरवाज्ञावशा ४५ कृ-
त्याकृत्य विवेकशासन विधे मुक्तो हि कोत्र श्रृणु श्रीकेदारमहो विसृष्टतनुकान्प्रास्त्येव तच्छासनं ४६ पापी वा सुकृती तु वा द्विजवरा राजन्य विट्शूद्रका। ये चान्ये वापि विलोमपुल्कसमहाम्लेच्छापि चांडालकाः ४७
अन्ये स्वेदजरायुजांडजगणाश्चैवोद्भिज्जजाता अपि। श्रीकेदारमहीं विसृष्टतनवो मोक्षं प्रयांत्येव ते ४८ तस्मात्कखिलदेहिनः [illegible] भस्मत्रिपुंड्राचिता। रुद्राक्षाभरणा रुद्रजापिनः पंचाक्षरजापकाः ४९
सेवंते शिवयोगिनः प्रीतदिनं ते प्रायश इह गोचराः। श्रीकेदारभुवि त्वया मतनु [illegible] ५० सत्यं ब्रूहि त्वं शृणु वामदेव त्वमप्यहं त्वेष नृपश्च धन्याः। लब्धा [illegible] गुरुजा यतो वयं केदारनाथस्य कृपाकटा-
क्षात् ५१ शिवकेदारकेदारके लोकेत्ययं ध्वनिः मोक्षलक्ष्मीपुरद्वारकवाटोद्घाटध्वनिः ५२ सत्यं ब्रवीमि सकलश्रुतिसारमेकं कामप्रदस्यमिदमात्मविदां सुगोप्यं। श्रावंतिये प्रीतिमनं शिवदत्तचित्ता स्ते यांति धाम शिव-
मोक्षपुनर्निवृत्तिं ५३ केदारेशं समाराध्य यस्येच्छा जायते यदि क्षणमुक्तः स च नास्त्यत्र श्रृणु देवि भवेद ५३ [illegible] इति महापूजा षोडशोक्त विधानतः। केदारेशाय वै यस्य प्रारब्धो मंत्रमुद्ध्वनिः ५४ स्वर्गलक्ष्मी मोक्षलक्ष्म्यो
तं वरातु परस्परं अहं पूर्विकया [illegible] ध्वनिः ५५ पाद्यार्घ्याचमनीयादि मधुपर्कमनुध्वनिः। स्वःस्वर्लोकाक्रमभया हृवानां कलहध्वनिः ५६ यस्य पूजामध्य मंत्रबस्य मातामनुध्वनिः सः स्वर्गमोक्ष
लक्ष्म्याश्च विवाहपटहध्वनिः ५७ अभिषेकार्थ रुद्रादि महामंत्र [illegible] ध्वनिः मोक्षसाम्राज्याभिषेके देवतादुंदुभिध्वनिः ५८ वस्त्रभूषणमंत्रोक्तध्वनिः केदारपूजने गौरी। संपूज्य देवाग्र प्राणो डिंडिमध्वनिः ५९ गंधपुष्पे
मंत्राणां ध्वनिः केदारपूजने। शिवप्रसादसाम्राज्य प्राप्ते डंक्का महाध्वनिः ६० यस्य केदार पूजायां [illegible] सर्वलोकाक्रमता पुरायाहोक्तानकध्वनिः ६१ यस्य केदार पूजायां धूपदीप मनुध्वनिः। सतं
वाभिमुख्योत्थ मांगल्य मुरजध्वनिः ६२ यस्य केदार पूजायां नैवेद्योक्त मनुध्वनिः। मोक्षलक्ष्मी पीराव्ये विश्वप्युत्काहलध्वनिः ६३ तांबूलफलमंत्रोक्त ध्वनिः केदारपूजने। सर्व देव प्रदत्तोपहार कालनीति ध्वनिः ६४ पू-
जने यस्य केदारे नीराजनमनुध्वनिः। मोक्षलक्ष्मी हृदः [illegible] भेरी महाध्वनिः ६५ यस्य केदार सविधे पुराण पठनध्वनिः। वक्तृवाचयितृश्रोतृ मोक्षलक्ष्म्या पदध्वनिः ६६ यस्य केदार निकटे मंत्रपुष्पमनुध्वनिः
केदारे यस्य ब्रह्मादि सन्मान निविडध्वनिः ६८ प्रदक्षिणा नमस्कार ध्वनिः केदारसंसदि। शिवधाम्नि महावीथ्यां संचारे तूर्यमुद्ध्वनिः ६९ आतिथ्यं ग्रासमात्रं वा दातुमाह्वानमुद्ध्वनिः। केदारप्रीतये यः कैलासे स्वागत ध्वनिः ७०
दातमन्नं च केदारभूसीयः स्वागत [illegible] ध्वनिः। स्वर्गलक्ष्मी मोक्षलक्ष्म्यो युद्धाहं पूर्विका ध्वनिः ७१ यस्य केदारसदने श्रोकार्यादि कृतिध्वनिः। सोनेककोटि ब्रह्मांडव्याप्त कीर्त्यानक ध्वनिः ७२ यस्य केदार निकटे स्तोत्रमंत्रो-
ग्रध्वनिः। स कैलास विहारार्थं निःसरत्पटहध्वनिः ७३ यस्य केदारयात्राशरणागत वाग्ध्वनिः। तस्याग्रे रुद्रकन्यानां सारवीणाघनध्वनिः ७४ यस्य केदारलिंगाग्रे चापराधक्षमाध्वनिः। तस्य पादनतो देवसंघहृन्मुकुटध्वनिः ७५

१-३-४-५-६ - पाठभेद सूर्य० २-३ क - पाठभेद लक्ष्मण० ७ - पर श्लोक सूर्य० अधिक है

किंमुने बहुनोक्तेन काश्यां केदार सेवनं। येन प्राप्तं सविघ्नेषु तनुरेव न संशयः ७६ केदार परितो लिंगान्य मितानि वसंति हि। तानि सर्वाणि देवैश्च दानवैर्दैत्य पन्नगैः ७७ राक्षसै रसुरैर्भूपैर्मुनिभिश्चाप्सरो

वैरः। स्थापितानि स्वयं भूति भुक्ति मुक्ति प्रदानि च ७८ पूर्वं क्रौञ्चकंठारव्यं तगोता प्रतिष्ठितं। तत्पूर्वं च मयूरारव्यं वारणारव्य ततः परं ७९ ततः परं च सिंहारव्यमजारव्यं च ततः परं। ततः परं च मायेशं बह्लि-

गानि क्रमात्पुरः ८० लुप्तानि यावदयस्ति कानि कानि स्थितान्यपि। अयः कश्यप दायादाः शूराख्या दानवाः पुरा ८१ साक्षात्स्कंदमधि क्षिप्य युद्धभूमौ लयं गताः। स्कंद प्रसादेन पुनः शूरा भुक्ति विधात्मना ८२॥

शिशिविकाल ज्ञानि भिधातस्य वाहध्वजा वभूत्। तारको वारणो भूत्वा महाशास्त प्रसादतः ८३ तस्यैव धाहता मात्पूर्वापास्ति प्रभावतः। सिंहास्योपि परा देव्याः प्रसादा द्वाहता नियात् ८४ पंचाननः परा

देव्याः पूर्वापास्ति प्रभावतः। तेषां भगिन्य जा सैका माया ख्याता प्रसूतया ८५ एते ह्यधिक्षिप्य देवं जाता स्कंदापाधिनः। तद्दो प्रशांत्यै स्कंदेन ह्युपदिष्टाः पृथक्पृथक् ८६ विमुक्ता अपि तद्दोष शांत्यै काश्यां

गुहाज्ञया। प्राचीन तीर्थे संस्नात् केदारं सम्यगर्च्य च ८७ लिंगान्यपि स्व स्व नाम्ना स्थाप्य शुश्रूषयन्गुहं। माता पुत्रौ शिवा भक्त्या प्रापतुस्तां शिवाज्ञया ८८ अयः पुमाः स्व स्व पूर्वामात्या प्राप्तास्वेष्टदेवताः। तस्मा-

दित्यादि लिंगानि पीरतः संत्यनेकशः ८९ अन्ये श्च मानवैः ऋषिभिश्चातुर्वरार्यैरपि द्विजा। संस्थापितानि लिंगानि तेषां मुक्ति प्रदानि च ९० गौर्याः संस्थापितं लिंगं गौरी तीर्थ तटे स्ति वै। तत्रैव लक्ष्म्या लिंगं च व्यास

लिंगं च भार्गवं ९१ सनत्कुमार लिंगं च स्थापितं प्राक्मयात्र वै। गंगा तपनजा वाशी स्थापितं त्रिनदीश्वरं ९२ इत्यादीनि पूर्व भागे लिंगान्यपत संख्यया। गंगायां कानि लिंगानि कानि संति तटे भुवि ९३

हृस्तितोपि तथा लिंगान्यमितानि लसंति वै। चित्रकेतुश्चित्ररथः चित्रांगद विचित्रकाः ९४ सीता लक्ष्मण शत्रुघ्न वायुभू भरतादयः। वानराश्च ऋक्षभल्लूका गोलांगूलास्तथा परे ९५ रामश्चैव महा तेजास्तथा

न्ये नृप सत्तमाः। आस्थापयन्स्वस्व नाम्ना वैमानस्व नादिभिः ९६ तथैव पश्चिमे भागे लिंगानि स्थापितानि हि। वैश्रवणेश्वरं लिंगं कालकेयेश्वरं तथा ९७ निवातकवचेशं च तथा वैरोचनेश्वरं। वल्मीकेश्वरतिभांड

संज्ञं बालकेश्वरं ९८ कुंडेश्वरं कुठारेशं परिभद्रेश्वरं तथा। शुंभेशं च निशुंभेशं कालीशं प्रमथेश्वरं ९९ इत्याद्यनेक लिंगानि स्थाप्य याताः शिवांतिकं। उत्तरेपि तथा लिंगान्यनेकानि वसंति हि १०० इंद्रद्युम्नेश्वरो धीशो निषध

शो गंगेश्वरः। हेमेशो बालखिल्येशो नारदेशः सर्वेश्वरः १०१ अक्रूरेशः कबंधेशः पांडवेशः क्षालनेश्वरः। तथा दशाश्वमेधेशः कुलेशः कुंडलीश्वरः १०२ इत्याद्यपरिमेयस्य स्वरूपा लिंग मूर्तयः। परितः संति विप्रेन्द्र श्रीमत्के-

दार भूतले १०३ कालेन कानि नष्टानि भग्नानि शिथिलान्यपि। भूमौ कानि विलीनानि प्रकाशंत्यपि कानि चित् १०४ एतेषान्नामधेयस्य श्रवणोपि विमुक्तिदः। विश्वेशश्च केदारः केदारो विश्वनायकः १०५ संदेहो नात्र

कर्तव्यः केदारोधिकतां दद्यौ। एवं केदारनाथो विलसति च मुदा काशिका भूमिभागे। सर्वेषां मुक्तिदायी निरभिमतमनःकामिनां योगभाजां १०६ येषां कामोस्ति चित्ते प्रदमभिमत सुरवान्यर्पयित्वा स्वलोके। तूर्ण

कृत्वा ततस्तान्ज्ञाने मृति रहितान्स्वे महिम्न्या दधाति १०७ श्रवणो मतिरस्तु यस्य चित्ते सुरहस्यस्य शिवेन भाषितस्य। स शिवस्य गणास्तु पार्षदवर्ती महितन्नास्ति हि संशयो मुनीन्द्राः॥ १०८॥ इति

श्री काशी मूल रहस्ये ब्रह्मवैवर्ते खिले काशी केदार माहात्म्ये द्वाविंशोऽध्यायः २२ ऋषय उचुः सूत पाराशर्य शिष्य सर्वज्ञस्ते गुरुः सलु सनत्कुमारो मुनिराट् कथं जातः प्रजापतेः १॥

अ०२२

- २ - पाठभेद सूर्य०

सर्वज्ञत्वं कथं प्राप्ता नित्यं पंचाब्दबालता। आतंचे दूषत दृष्टं त्वया यदि गुरो गुरवात २ इति पृष्टस्तदा सूतो मुनिभिस्तत्त्वदर्शिभिः। तदा प्राह पुरावृत्तं श्रुतं व्यासान्महागुरोः ३ सूत उवाच शृणुध्वं मुनयः सर्वे
वदामि भवतामहं। इयमेव पुरा पृष्टः सनकाद्यैः स्वनायकः ४ वामदेवो यतिश्रेष्ठो नाथशर्माहितां कथां। पुरा कदाचित्कल्पांते पुनर्ब्रह्माभवद्यदा। सृष्टिप्रसाराय विधिः शिवं प्रार्थयत्तदा। वर्षाणाम
युतं ब्रह्मा एकाग्रमनसा तपत् ६ तदा प्रसन्नो भगवान् परमात्मा परः शिवः। प्राह गंभीरया वाचा वरं ब्रूहीति शंकरः ७ तदा प्राह विधिः शंभुं सृष्टिवृद्ध्यै जगत्त्रये भगवंस्त्वत्प्रसादेन त्वद्दीये लोके विस्तारः ८ ये
था भवेत्तथा सम्यगाज्ञापय निजान्वान्। ये प्रभूय जगत्सर्वं प्रजया पूरयंतु ते ९ एवं विधिं प्रार्थयंतं ज्ञात्वोत्कर्षं शिवात्मनां। तेषामर्थाय च नित्यापूर्वकल्पाः कृत्यष्विताच्छयत् १० मोक्षमत्पुत्रतां गा
तिते सर्वं साधयेति स। तदा प्राह विधिं शंभुर्ज्ञानेभीष्टं तु दुर्लभं ११ तथापि ते प्रार्थनया प्रेषयिष्यामि मामकान्। त्वयि तान् जातमात्रेण संबोध्य स्वकृतिं कुरु १२ इत्युक्त्वा शंकरः स्वीयानाहूयेदमभा
षत विघ्नेशं वीरभद्रं च नंदिकेशं कुमारकं १३ महाकालं च पंचैतान् प्राह शंभुर्विधेः पुरः। पुत्रतामात्मसुतत्वा जात्वा प्रार्थयत्येष सृष्टये १४ यदीच्छा भवतामेवं विस्तारयत वै जगत्। तदा प्राहुः शिवं ते वै श्री
श्रीमदाज्ञा गरीयसी १५ भवाम व्याजतः पुत्राः सृष्टिर्भवतु भावना। यदा त्वं स्मरसे ब्रह्मंस्तदा पुत्रा भवाम वै १६ इतीते शंभुना सार्धं तिरोधानं गताः क्षणात्। तदा ब्रह्मा तुष्टमनाः सृष्टिवृद्धिर्भवेदिति १७ स्व
लोकं प्राप्य सृष्ट्यर्थं सस्मार शिववल्लभान्। स्मृतिमात्रेण मनसा जातोग्रः सनकाख्यया १८ बभूव वीरभद्रोपि सनंदनसमाख्यया। नाम्ना सनातन इति नंदिकेशस्ततस्त्वभूत् १९ सनत्कुमाराभिधया कुमारः
समजायत। सनत्सुजाताभिधानो महाकालोप्यभूत्ततः २० एवं पंचापि ते देवाः शिवात्मानः शिवाज्ञया। ब्रह्मणो मानसाः पुत्राः संजाताः पंचहायनाः २१ शिवपादाब्जसंल्लग्नचित्ता नेता मुमुक्षवः। विरक्ताः
सर्वभावेषु नित्यतृप्ता द्विजोत्तमाः २२ तानाह धाता हे पुत्राः पुत्रपौत्रविवृद्धितः। सृजध्वं बहुधा सृष्टिं देवतिर्यङ्नरात्मकं २३ इति ब्रह्मवचः श्रुत्वा तूष्णीं याताः शिवं स्मरन्। व्रह्मापंकामतपसा
परमेश्वरमायया २४ किमनेन हि संवादात्स्माकं तु शिवात्मनां। इति ते स्वेच्छया तूष्णीं मुक्ता इच्छया २५ तान्विलोक्य तदा ब्रह्मा नैते सृष्ट्युन्मुखा इति॥ पुनस्तपश्चचाराशु सृष्ट्यर्थं
शरदां शतं २६ पुनः सृष्ट्या मानसा न वृद्धिं प्रापयेज्जगत्। एवं पुनर्वारशतेन प्रवृद्धं यदा जगत् २७ तदा मैथुनया सृष्ट्या पूरयामास वै जगत्। तेष्वेतेषु परा रुद्राः सनकाद्या महत्तराः २८ तुरीये
यतेषु योगी स्कंदांशो ब्रह्मवित्तमः॥ सनत्कुमारनामायं कुमारोह्यपरः कृती २९ न ज्ञाने त्रिषु लोकेषु किंचिदप्यसि चामुना। शिव एव स्वरूपेण वैराग्यं ब्रह्मनिष्ठतां ३० लोके दर्शयितुं प्राप
स्वात्मभूतैः कुमारोगना। नित्यं पंचाब्द वयसो ब्रह्मनिष्ठा मुनीश्वराः ३१ यत्रेच्छा तत्र गच्छंति स्वर्गमर्त्यरसातले। ब्रह्मलोके विष्णुलोके रुद्रलोकेन्यभूमिषु ३२ अनिवार्यगतिस्तेषां न कुत्रापि
निवार्यते। येषां शोनमभक्तं द्वारपालो स्थितो जनं ३३ प्राप्य शंभोः पदं जातो जयश्च विजयः पुरा। तादृशास्ते महात्मानः सनकाद्याः शिवबालकाः ३४ लोकसंरक्षणार्थाय यांति स्वेच्छया द्विजाः।
येषां दर्शनमात्रेण ब्रह्माद्याः प्रणमंति तान् ३५ विलासमपरं श्रुत्वा बहुरूपा मुनीश्वराः। अलवद्योचाच भगवन्मे शरणानाथ शिव ज्ञानैकसागर। महाविष्णोर्द्वारपालौ शिवपार्षद गताविते ३६

प्र०वै० ६८ — का० के०आ०

यदाज्ञापय स्वामिन्नत्र मे संशयो महान्। चक्रपाणौ द्वारपालौ शापाद्भूमौ जनिं गतौ ३७ शापान्ते विष्णुमुत्सृज्य कथं धाम्नः पदं गतौ। इति पृष्टस्तदा पत्न्या नाथ शर्मा हि तां कथां ३८ नाथशर्मोवाच शृणु भद्रे प्रवक्ष्यामि रहस्यं परमात्मनः। पुरा विष्णुस्तपस्तप्त्वा वरं प्राप महेश्वरात् ३९ स्वामिंस्त्वत्समीपस्थौ गणौ रक्षन्तु मामिति। शिवमप्रार्थयच्चाद्रौ तदा देवो दयानिधिः ४० सुभद्रभद्रनामानौ स्वगणौ प्राह चाह्वयन्। युवां हरेर्द्वारभागे स्थित्वा विष्णोः प्रशासनात् ४१ जित्वा शत्रून्महाविष्णोर्विजयं दास्यथः सदा। इति शंभुवचः श्रुत्वा तौ प्रणम्योचतुः पुनः ४२ भगवन्पादसेवां नौ कदा न हि पुनर्लभेत्। दुर्लंघ्या श्रीमदाज्ञा वां वियोगेन सहावहे ४३ उभयं दुर्घटं प्राप्य भावास्यां किमकुर्वहे। इत्येवं वादिनौ भक्तौ प्राह कारुणिकोत्तमः ४४ भवतो युगमंशेन कुमार मुनिना पुनः। शापव्याजेन मत्पार्श्वे प्राप्स्यथश्च चिरात्मनः ४५ स्थित्वांशेन हरेर्द्वारि तस्य कल्पावधि क्षरात्। गमयित्वा पुनर्मां वै प्राप्स्यथस्तेन मां पुनः ४६ यस्य यस्याः हमः दृश्वरं मद्गणा साह्युतः। तत्र तत्रांशभागेन तिष्ठति मम वल्लभाः ४७ ब्रह्मणा प्रार्थितः पूर्वं सृष्ट्यर्थं गतास्साह्युतः। हे सुभद्र नंदीश महाकुल कुमार कालन् ४८ आदि शंतेति मत्पार्श्वे तिष्ठं त्वंशा बहुत्वतः। एकांशेन द्विजा भूत्वा प्रसिद्धाः संचांति हि ४९ अन्येपि बहुला रुद्रा वृक्षभूम्यर्णवादिषु। प्रदेशे प्रवन्ने पवने वर्षेषु च इति प्रथा ५० चरंत्यंशेन जगति मत्पार्श्वेपि वसंति हि। मद्भक्तशापव्याजेन भवेज्जन्मत्रयं युवां ५१ तेषु जन्मसु मामेव संपूज्यानन्यभावितः। द्वितीये जन्मनि पुनर्मामेवापत्स्यथ पुनः ५२ एकांशेन स्थितौ जन्म तृतीयं प्राप्य विष्णुना। शापांते च युवां पश्चान्मत्समीपं नयिष्यथः ५३ अंशमात्रेण तत्पार्श्वे स्थित्वा तत्कल्पकावधि। तेन सार्कं मम सदः प्राप्स्यथोन्यो भवेद्धरिः ५४ एवं हरेर्पदे सर्वं भविष्यति पदे पदे। तथैव विधिधामापि वद्युगे भानुमाति ५५ मदाज्ञयैव लोकेषु विष्णुब्रह्मादिषु। आधिपत्यं तदेशत्वं मदंश मितिजानथा ५६ अनुशाप्यैवमीशस्तौ गणौ भद्र सुभद्रकौ। प्रेषयामास विष्णुवेग्र द्वारौ च बभूवतुः ५७ असुरा दैत्य दनुजा विष्णु यशसा रथिनः। तानायासेन तौ जित्वा नूयं विष्णोः प्रदास्यतः ५८ जयश्च विजयश्चेति ददौ नाम तयोर्हरिः। कदाचयोः पुनः सेवा लभेच्छम्भो रीति स्मरन् ५९ सर्वांशेन विभोः पार्श्वे वसेवानंद निर्भरौ। एवं कतिपये काले गते च सनकादयः ६० संचरल्लोक मखिलं क्रमाल्लोकं हरेर्ययुः। तत्पूर्वं च महाविष्णुलक्ष्म्या सार्कं स्थितो रहः ६१ महिमानं महेशस्य वदन्लक्ष्मीं महाद्भुतं। द्वारपावाह भगवानागच्छेत्कोपि मत्सदः ६२ प्रवेशोमेषा मा मुक्त्वा सहसा न विशेदिति। तस्मिन्काले समायाता ह्याचार्याः सनकादयः ६३ द्वारि तितो वेत्रहस्तौ दृष्ट्वा तेतौ वचो ब्रुवन्। कौ युवां मार्गरोद्धारौ दैत्यौ वा राक्षसौ नौ ६४ मा हृष्टां प्रीतरोद्धारौ कुधियौ नात्र संशयः। लोके सर्वसमो विष्णुर्विरक्तास्तादृशा वयं ६५ विष्णोः पार्श्वे युवां वस्तुं न योग्यौ निर्घृणौ ध्रुवं। एवं वादिषु विप्रेषु ह्यास्यावत्यंत कंपितौ ६६ प्राप्ता हि नौ महाशापो मुनीनामपराधतः। इत्येवं चिंत्यमाने तु द्वारपाल द्वये तदा ६७ अहो कष्टमिति ज्ञात्वा बहिरागाद्धरिर्मुनीन्। पूजयित्वा यथान्यायं कुशल प्रश्नपूर्वकं ६८ लक्ष्मी समेतो भगवन्प्राशं सच्चिद्वयोगिनः। यूयं दयालवः प्राज्ञाः शिवज्ञानेक सागराः ६९ क्षमावंतः सर्वसमाः सत्यं हि भवतां वचः। कोन्यथा कर्तुमीशोत्र भवद्वाचं सुरेष्वपि ७० यूयं शिवध्यान धूतमाया जालपरंपराः। एवं स्तुवति लक्ष्मीशे ह्यास्यावागत्य नेमतुः ७१ तौ दृष्ट्वा मिवच्च मनसौ-

अ०२३

६८

१-२-३-पाठभे०

मुनयः स्ववचः स्मरन्। आज्ञाक्लीबत्वशंभोर्मा दशामपि वाक्कृतः ७२ निःस्पृहा द्वास्यविषये शिवेच्छा नान्यथा तथा। तस्माज्जन्मत्रयं दैत्यरक्षोमानुषमेतयोः ७३ भविष्यति हि भो भाक्तात्कृपया
तेषु जन्मसु। पुत्रव्याजेनाहमेतौ उद्धरामि शिवाज्ञया ७४ सहस्रकोटिभवभवान् एतयोः कृतिं प्रति विष्णुमेवं संवदति सनके प्राह वै स्मा ७५ अन्यथा परमेशाज्ञावशाद्दुद्धृतयेतयोः। अहं द्वितीये व्याजेन
जन्मनि प्रविलोमश्च ७६ एतौ समुद्धरिष्यामि शिवाविष्टेन विष्णुना। ततः प्राह महाविष्णुस्तृतीये पे हं च जन्मनि ७७ स्वयमेवोद्धरिष्यामि चाज्ञयैतौ महेशितुः। अयं सनत्सुजातेपि दर्शनं मे दिशेद्विभुः ७८
आत्मोपदेशान्नृपतिं तदा वैचित्रवीर्यकं। तीरं तु भुवमायात वद चोद्धृतिमेतयोः ७९ इत्येवं तौ समाधाय द्वास्थौ याता महर्षयः। तौ जातौ प्रथमं जन्म हिरण्यकनामकौ ८० एकः कशिपुसंज्ञश्च द्वि-
तीयः पूर्वाक्षनामकः। कशिपोः पुत्रभावेन प्रल्हादः सनकस्त्वभूत् ८१ समुद्धर्तुं मनुजात्मः सन्हीशः शंभुं व्यजिज्ञपत्। भयानसाध्यस्ते भक्तस्त्वं सर्वांगेन मां विश ८२ तावुद्धर महाभाग इति संप्रार्थितो हरः। इति सर्वां
शतः सिंहनराकारः शंकरः ८३ व्याजीकृत्य महाविष्णुं कशिपुं स समुद्धरत्। तथैव क्रोडरूपेण व्याजीकृत्य हरिं हरः ८४ अक्षात्व्य मुद्धरच्छंभुर्हिरण्यपदपूर्वकं। एवं सनकपुत्रत्वात्पुत्रहिंसने हस्ततः ८५
प्रथमं जन्म निस्तीर्णौ द्वास्थयोः शिवभक्तितः। अथ द्वितीये संप्राप्ते जन्मनि क्रोधसहायतः ८६ विश्रवाः शिवं समाराध्य कुंभोद्भूतोपदेशतः। रुद्राविष्ट श्रीरसः सनन्दनस्त्वौ [illegible] चतौ ८७ समुद्धर
नदातौ हि प्राप्तौ शंभोः पदं स्मरणात्। रावणः कुंभकर्णश्च यौ भूत्वा खिलांगुलः ८८ सुभद्रभद्रौ जायेतां रावणाद्वो न्यमुद्धृताः। एकांशेन पुनर्विष्णुस्ता बुद्धार्थं निजान्तिके ८९ तृतीयात्र जन्म
तो द्वास्थाव द्याप्यंशेन तिष्ठतः। एवं शिवगणौ दीपौ तो [illegible] मुक्तः प्रिये ९० सनकाद्याः शिवगणास्त्वेवं शंभुपरायणाः। शिवाद्न्यं न किंचित्र नेक कोटि [illegible] ९१ शिवं प्राह शिवो गुह्यं
प्रीतात्मा कुक्कुटध्वजः। इदं रहस्यं परमं योगस्यासीत्यवदं तव ९२ नाभक्ताय प्रदातव्यं शिवे च स्मृतितारकं। शिव ज्ञानैकसंतानं शिवभक्तिप्रदं नृणां ९३ शिवात्मनां च माहात्म्यं विचित्रं शृणु मत्प्रिये। शिव याग
बलात्स्वैरं बहु तपा वसंतौ तौ ९४ पश्यतो रावणात्वं च प्राप्य शंभोः प्रियौ गणौ। सुभद्रभद्रनामानावपि पूर्ववदास्थितौ ९५ विष्णोर्द्वास्थौ पुनरपि चित्रं तेषां गतिः प्रिये। सनकाद्या अपि पुनः शिवांशाद्ब्रह्मसूनवः ९६
हिरण्यस्यापि काश्यपः पुत्रोभूत्सनकः पुनः। इत्यनेकविधा लीला विचित्रा शिवयोगिनां ९७ सनत्कुमारोत्पत्तिस्ते प्रोक्ता लहरीदधाय। वामदेवोत्पत्तिमपि वदामि शृणु मत्प्रिये ९८ इति निजदयिता
रहस्यमाद्यं परमशिवस्य जगाद नाथशर्म्मा शृणुत मुनिवाः पापं यदाह तदपि वदामि च वामदेवमूलं ९९ यद्दृष्टं शृणुयान्महारहस्यं शिव कथितं परमं स्मरं शुभं ॥ शिवायै सत्यं हि शिव
धर्मभागः पुनरावृत्तिं विवर्जितं महत्तत्व १०० इति श्री काश्यां मूलरहस्ये ब्रह्मवैवर्ते खिले काशीकेदारमाहात्म्ये त्रयोविंशोऽध्यायः॥ २३॥ ऋषय ऊचुः बादरायणशिष्य
सूतज्ञानामृतोदधे। नाथशर्मा स्वजायायै वामदेवसमुद्भवं १ कथं प्राह वदास्माकं येनेदं लोकतारकं। दृष्टं रहस्यं शिवयोः प्रसृतं भुवनत्रये २ तादृशस्य महर्षेस्त्वमुत्पत्तिं शिवयोगिनः इति

१- पाठभेद स०

प्र०८०   का०के० मा०

६८

पृष्टस्तदा सूतो मुनिभिस्तत्त्वदर्शिभिः।३ प्राह तान्विस्मयकथां रहस्यां जनतारिणीं। सूत उवाच। शृणुध्वं मुनयस्सर्वे धाम देवो ह्यवां कथां।४ पूर्वं कैलासशिखरे शुद्धांतो पवने शिवौ। विहरंतौ बहुकृतानवुझानंदैक-
समागौ। विहृत्य चिरकालं तौ एकांते तस्थतुस्तदा।५ देवी प्राह महादेवं स्वामिन्सर्वचित्तसंस्थित तव स्वरूपं को हन्त मनोवाचामगोचरं।६ श्रुतयः शिरांस्यपि पुनस्त्वामाहुर्नेति नेति च। तत्तत्त्वं मां बोधय
स्वरूपेनाहं त्वत्समाभवं।७ इदानीं देहभागार्धा स्वरूपस्यापि तत्त्वतः। मयैव कल्पितं रूपमिदं ते त्वत्सहायतः।८ त्वत्सान्निध्यं विना शक्तिर्मम नास्ति जगत्कृतौ। त्वत्सत्तयाहं चैतन्या मूलप्रकृतिरप्यहं।९
तवसत्तात्मकं बोधं यथा मे स्यात्तथा वद। इति शंभुः पराशक्त्या पृष्टः प्राह सतां पुनः।१० शृणु देवि प्रवक्ष्यामि मद्बोधो ह्यतिदुर्लभः। मद्भक्तिरेव त्वं यस्माज्जानास्यचिरं मंजसा।११ मदात्मबोधकाले
त्वकोऽप्यन्यो नैव तिष्ठतु। पशुपक्षिमृगा देशाद्यप्येतत्कृणुयुर्यदि।१२ ज्ञानं तेषां भवेत्सद्यः स्वात्मन्यन्यत्रेति हि ध्रुवं। तेन ज्ञानेन मायाते नश्यत्येव भ्रमात्मिका।१३ तदा त्वां कोऽपि मद्भक्तं मन्यते
नैव सर्वथा। तस्मात्सत्कार्यसिध्यर्थं विविक्तं प्रार्थ्यते मया।१४ इति शंभुवचः श्रुत्वा शुद्धान्तो ध्यानसंस्थितान्। जीवानुत्सारयामास कृमिकीटादिकानपि।१५ उत्सार्य सर्वान् जंतून्सा देवम
प्रार्थयत्पुनः। स्वामिन्दयां कुरु विभो स्वस्वरूपमुपादिश।१६ विविक्ते विजने शंभो स्वात्मोद्याने सुसंविदं। तदा दयालुर्गिरिशो बिल्वमूलेऽन्वबोदत।१७ दक्षिणामूर्तिरूपेण धृतचिन्मुद्रपाणिना। स्वा-
त्मज्ञानं महादेव्यै संबोधयितुमारभत्।१८ तदा तद्बिल्ववृक्षस्य कोटरे द्विजगह्वरे। खगाः पारावतौ लीनौ निर्गतुं नाशकद्धिया।१९ गंभीरकोटरान्तस्थोऽप्यशृणोदात्मसंविदं। देव्यै समुपदिष्टं तत्संसारो-
दधितारकं।२० स्वात्मन्यनुभावसद्भावतत्त्वब्रह्मात्मनिर्णयं तत्त्वमस्यादिवाक्यार्थसार चा स्वव चेतन२१ नेति नेतीत्युपनिषद्बोधशीर्षनिरंजनं। स्वात्मैकवेद्यं स्वानुभवबोधमात्रा-
त्मा चिद्घनं।२२ अनाद्यनंतारं वेदैकसच्चिदानंदनिर्भरं। शिवं शांतं तुरीयाख्यं तुरीयातीतमद्वयं।२३ कारणं जगतां मायामिथ्यावैचित्र्यसद्घनं। स्वतो भातं स्वतः सत्यं स्वतः सिद्धं स्वतः स्थितं।२४ अ०२५
श्रुत्यनुग्राहिताशेषानुमानैकानुमानितं। स्वानन्यं स्वप्रतिष्ठानं भावाभावविवर्जितं।२५ एतादृक् स्वात्मविज्ञानं देवो देव्यै ह्युपादिशत्। तत्क्षणं चवरा शक्तिः स्वात्मानन्यावभूवह।२६ महा
गुरूपदेशेन विस्मृत्य देहभावना। स्वानन्यभावज्ञानेन शिवं नान्यं न चाविदत्।२७ देहसंघातमखिलं भावनावर्जितं जडं। न्यपतद्वासना शून्यं देवी पूर्णात्मतामियात्।२८ पारावतः कोटरस्थो
दृष्ट्वा श्रुत्वात्मसंविदं। सद्गुरोः सुमहिम्ना च गतदेहात्मवासनः।२९ अवाप स्वात्मतामाप जीवन्नेव सतत्क्षणं। देहसंघं तु विस्मृत्य ऊर्ध्वस्थतरुकोटरात्।३० पपात तस्य देहोऽपि तरुमूले जडात्मकः। दृष्ट्वा द्विजं
महादेवः किमेतदिति विस्मितः।३१ ज्ञात्वा ज्ञानदृशा सर्वं महादेवो दयानिधिः। आत्मज्ञानात्स्वात्मभूतं त्यादेहं स्पृशन् [illegible] लोकलीलाविनोदार्थं स्वशक्त्या साभवत्पुनः। सा देवी पुनरुत्थाय दृष्ट्वा पक्षि-
तनुं भुवि।३३ किमेतदिति पप्रच्छ चित्रं देवस्य वैभवं। त्वमेवैतद्द्विजानीष्वाः सर्वात्मा सुपदेशतः।३४ तदा देवी ज्ञानदृशा द्विजवानाप्रकारणं। ज्ञात्वा देवं तदा प्राह जीवयैनं द्विजं त्विति।३५ मदाज्ञा-
लंघकस्त्वेष लोप्य वृक्षाग्रकोटरे। तस्मादस्य भवेज्जन्म द्विजस्य द्विजकुक्षितः।३६ एवं वदंत्यां देवेशां द्विजभ्रांतिम दाच्छिनः। ततो द्विजः समुत्थाय प्राणम्य गुरुदंपती।३७ श्रात्वा देवी

६८

१. लीनौ / १-२-पाठभेद लक्ष्मण०   ३-पाठभेद सर्व०

शापवचः प्रसन्नमाह तौ द्विजः। जन्मान्यनेककोटीनि भवंतु मम सद्गुरो ३८ कामं निर्मे गुरुवौ स्वात्मभूताखिलात्मनः। द्विजत्वं क्षत्रियत्वं वा त्वयान्याखिलसृष्टिषु ३९ त्रिमूर्तिं वाप्यवामेस्तु नाहं
तद्भेदमूर्तिमान्। स्वयमेव स्वतो भामि स्वात्मानंदगुरोर्बलात् ४० इति वादिनमेवं ते दृष्ट्वा चित्रा च्छिवा शिवौ। परिपक्को भवद्यं लोकलीलां करोत्विति ४१ शृणु द्विज ब्रह्मनिष्ठ द्विजो भव महान्यथा
लोकलीलां कुरुष्वांते मामेवाप्स्यसि नान्यथा ४२ देवी वचः पालनाय द्विजजातत्सुद्भवः। वामया सह देवोऽहमासीद्यं ब्रह्मते यतः ४३ नाम्ना त्वं वामदेवाख्यो भव लोकेषु विश्रुतः। न ते
गर्भभयं भूयान्मन्मायापि न ते भवेत् ४४ गर्भ एवात्म ज्ञानवांस्त्वं भव मत्प्रसादतः। अध्यात्म विज्ञानमहिमत्वान्न सिध्यति ४५ द्विजत्वं ज्ञानिषदाद्यपि ज्ञानाय कारणं। तस्मादेकं
विप्रजन्म प्राप्य मामाप्स्यसि ध्रुवं ४६ इत्याज्ञां शिरसा धृत्वा गुरोः कारुणिकस्य सः। पार्वत्या विप्र सूनुर्वामाभिधोऽभवत् ४७ गर्भ एवाप्य विज्ञान ऋषि ज्ञानविदां वरः ब्रह्मनिष्ठः शिवज्ञानी
प्रख्यातो भूसुरेषु सः ४८ अनवद्य वामदेव समुत्पन्नोऽरयं प्रिये। लोकोपकृतये विप्रः संचरत्यात्मवित्तमः ४९ शिवैकचित्तः सततमन्यत्सर्वं परित्यजन्। सूत उवाच शृणुत मुनि
वरेन्द्रा नाथशर्मा स्वजायां स्वयमकथयदेवं स्कंददेवोपदिष्टं। पर्यये वरहस्यं प्रातानंदः शृणोति प्रसभमखिलपापान्यर्दयन्याति शंभुं ५० भवबंधविमुक्तिदा विचित्रं
परमेशान रहस्यमंविकाये। उपदिष्टं सकृदप्युमेश भक्त्या शृणुयाद्यः स विमुक्त एव सत्यं ५१ इति श्री काशी मूलरहस्ये ब्रह्मवैवर्ते खिले काशीकेदारमाहात्म्ये चतुर्विंशोऽध्यायः २४
ऋषय ऊचुः शिवज्ञान रसानंदकंदभूत महामते। सूतास्माकं यदीयो रहस्यं द्रवतो जनं १ कथ्यातोऽध्यं त्वयान्नामयेन पृष्टौ मुनीश्वरौ। वामदेवकुमारौ सद्रहस्यस्य प्रकाशकौ २
तत्प्रश्नव्याजतः शंभो दिव्यवागभवन्मुने। तया वामकुमाराभ्यां रहस्यं सप्रकाशितं ३ काशीं विनिंद्यापि नृपो लिंगान्यपि महेशितुः। ज्ञानवानिति गर्वेण दुर्विदग्धोपि मोक्ष्यतः ४॥
पुनः शिवप्रसादस्य योग्योभूत्केन हेतुना। शिवाज्ञया कुमारोपि रहस्यं श्रावयत्कथं ५ तादृशस्यापि नृपते र्गविष्ठस्य वदस्व नः। इति पृष्टस्तदा सूतः मुनिभिः शिवयोगिभिः ६ सूत उवाच
पुनर्विप्रान्जलिं चन्द्रवतः क्रमात्। शृणुध्वं मुनयः सर्वे नाथशर्माभ्यमुकयां ७ स्वपत्न्यै प्राह युष्मभ्यं तां वदामि शुभावहां। पुरा हिमाचलप्रान्ते नेपालभुवि भूसुराः ८ शिवं पशुपती
शाख्यं प्रक्षालं परिसेवयन्। कश्चिद्विवालविज्ञानी शिवशर्माभिधो द्विजः ९ भस्मोद्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकः। रुद्राक्षधारी मुकुटके यूरकंकणः १० पंचाक्षरी
जपपरो रुद्राध्याय जपी सदा। शिवलिंगार्चनपरस्त्रिकालं नियमेन सः ११ श्री मत्पशुपतौ ध्यानसेवानियमतत्परः। कुटुंबी नित्यनैमित्तकर्मश्रद्धापरायणः १२ एवं भूतस्य विप्रस्य
गृहकर्माणि साधितुं। काश्चिद्भिल्लो वनचारी क्षुत्क्षामो दासतामगात् १३ तस्याज्ञां शिरसा धृत्वा विप्रस्य सततं भिल्लकः। गृहकर्माणि सर्वाणि करोति कुहकं विना १४

१-२-३-४-५ पाठभेद सूर्य०   ६ - [illegible] लक्षण० नहीं है

कदाचित्तमधिक्षिप्य विप्रकार्यान्तरेषु सः। वदत्यद्य तव द्विप्रं क्षमो विप्रो न किंवदेत १५ एवं स्थिते तदा विप्रे कालात्पशुपतीश्वरः। विप्र प्रसादसम्मुखो नभोवाग्यवदद्द्विजं १६ त्वयि प्रसन्नोऽहं विप्र

भट्कालं सेवया तव। मद्भक्त्या द्विजयोगेन ज्ञातस्मात्ताकर्मणा १७ मम ज्ञानं तव भवेदपरोक्षमसंशयं। इतः परे जन्मनि तेन ज्ञानेनाप्स्यसि च मां १८ इति वाच्यं द्विजः श्रुत्वा शिवोक्तमिति निश्चयन।

विरक्तः शिवभक्ताग्र्यस्तपसा काय शोषणात् १९ प्रायोपवेश व्याजेन त्यक्तदेहो भव द्विजः। स एवान्यभवे ख्यातो गर्गो नाम महामुनिः २० गार्गी नाम्नी तस्य पत्नी यामाहुर्ब्रह्मवादिनीं। वेदोपनिषदां

मध्ये प्रतिपाद्या मुनीश्वरैः २१ यया कृते पूर्वपक्षे याज्ञवल्क्यादयोऽपि ताः। ब्रह्मवित्त्वेऽपि विख्याता समाधास्यन्त कृच्छ्रतः २२ तस्याः पतिः पूर्वभवे गर्गो भूदुत्तरे भवे। ब्रह्मनिष्ठः शिवज्ञानी प्रख्यातो ब्रह्म

वादिषु २३ यो भिल्लस्तस्य शुश्रूषां चकार प्राग्भवे चिरं। सेवाबलाच्छिवमुनेर्नृपो भूदन्यजन्मनि २४ चंद्रवान्नाम धर्मज्ञः पार्वतीयो हिमाचले। प्रतापवान्कीर्तिमांश्च ब्रह्मण्योऽनेकयज्ञकृत् २५ तस्य

धर्ममतिं ज्ञात्वा त्रिकालज्ञानवान्मुनिः। पूर्वजन्मनि भिल्लं तं स्वात्मसेवाफलान्नृपं २६ ज्ञात्वा गर्गो महायोगी तमुद्धर्तुमगान्नृपं। राजन्नमात्मविज्ञानमुपादिश्य क्रमेणासः २७ तेनाप्तज्ञान

विभवः प्राप्तवैराग्यवान्नृपः। गुरुं प्राह नृपो विप्रं गर्गं ब्रह्मविदांवरं २८ स्वामिन्राज्यं सुतेस्थाप्य तपः कुर्वीति मे मतिः। उक्तूतालपसे स्थानं ममादिश महागुरो २९ इति पृष्टस्तदा राज्ञा प्राह गर्गो

नृपं तदा। केदारं गच्छ तपसे तत्र सिद्धिर्भवेत्तव ३० उपाधिरस्ति कश्चित्ते सिद्ध्यै पूर्वभवे कृता। न भवेत्सा यदि तव कृतार्थो ह्येव नान्यथा ३१ तदा प्राह नृपो विप्रमुपाधिः कोऽगुरो वद। केनोपायेन

मा भूयादुपाधिस्तं च मे वद ३२ इति पृष्टस्तदा प्राह भयगर्गः शिवात्तधीः। शृणु राजन्पूर्वभवे भिल्लस्त्वं विप्रसेवकः ३३ सेवापरोऽपि मोरर्थ्यात्त्वं तं कदाचिदतिक्रमेः। क्षमावानृषियोगी सन

त्वां किमपि चोक्तवान् ३४ तस्य सेवाफलं राज्यभोगं प्राप्तं त्वयाधुना। तदधिक्षेपणाफलं ज्ञानविघ्नाय तिष्ठति ३५ तस्मान्मयास्मद्गुरुणा प्राप्तज्ञानोऽपि सन्भवान्। भवसि त्वं सांतरायः ज्ञानसिद्धौ वि-

भाषिसे ३६ इति तदुक्तं श्रुत्वा सद्गुरोर्वचनं नृपः। प्रणिपत्य पदद्वंद्वे रक्ष मां कृपया विभो ३७ त्वं त्रिकालज्ञाननिधिर्येनाहं तारितो भवं। तथानुग्रहः कार्यो भवच्चरणसेविनः ३८ तदा दयालुः कृपया

नृपमाह महागुरोः। दयात्वापरशिवं चिन्ते कृतार्थस्त्वं भवेति तं ३९ शिव एव करोतु त्वां कृतागासमपोद्भवे। मत्प्रीत्यै मे प्रभुर्नाथः प्रपंचानामिति द्विजः ४० उक्त्वा हस्तेन संस्पृश्य तपसे प्रेषयद्गुरुः।

स राजा चन्द्रवान्नाम यस्यार्थे शिववागभूत् ४१ कुमार मुनये मूलरहस्याख्यानहेतुकी। प्राज्ञापराधोऽपि नृपः कृतार्थो भूच्छिवाज्ञया ४२ एषा देवि नृपोत्पत्तिस्तवयेमुरा विदः। वदंति शैवविवाहोऽपि

तथा मां समुपादिशत ४३ पशवो देवे न कुर्वन्ति किं किं शैवजना भुवि। क्वचाको भिल्लतनुः क्व राज्यश्रीश्च ताहशो ४४ येन प्राप्तः पुनर्मुक्त्यै कीदृशः सत्सुनुग्रहः। तस्माच्च शिवभक्तानां महिमा केन

वार्यते ४५ अकर्तुं कर्तुमपि चान्यथा कर्तुमपि प्रभवः। शिवभक्तास्तत्प्रभावं जानाति शिव एव हि ४६ नापराधः शिवजने प्रकर्तव्यः कदाचन। पश्य राजन्पूर्वं कृतः सेवाफलमपीदृशं ४७

अपराधफलं तद्वद्वशेनापि चागमत्। तथापि शिवयोगींद्रानुग्रहं गोवतारित:४८ अकृत्वा सेवनं शंभुभक्तेश्वर्य कृतागसां। कागतिर्नैव जानामि सैव जानाति शास्त्र:४९ इत्यहं महिलां विप्रा नाथशर्मा शिवप्रिय:।
राजभ्रष्टं स्वतोत्पत्तिं तद्बुद्धिं च स ह्रीतं५० इत्थं ह्यद्भुत शंभुभक्ति महिमा सां रहस्यं परं यो नित्यं पठते तथा शिवजनान्संश्रावयत्यादरात्। श्रोतार: पठिता च शंभुकृपया ह्याजन्म पापं स्वागाधिधुयाविल
भुक्तभोगविभवाश्चांते शिवं यांति ते ५१ शृणुत मुनिवरेन्द्रा: पापतूलानलाख्यं परमशिवरहस्यं नास्तिकानैव वाच्यं। परमशिवरहस्यं य: शृणोति प्रभक्त्या सकृदपि खलु सत्यं स प्रयाति प्रधाम ५२
इति श्रीकाशी मूलरहस्ये ब्रह्मवैवर्ते खिलेकाशी केदार माहात्म्ये पंचविंशोऽध्याय: २५ ऋषय ऊचु: सूत सत्यवती पुत्रप्रेमास्पद महामते। त्वन्मुखांभोज निष्यंद मकरंद रसायनं। श्रवणांजलिना
पीत्वा तृप्तिं नोपलभामहे। नाथशर्मा शिवपदांभोरुहासक्त षट्पद:।२ अनवद्या चास्य पत्नी शिवापादाब्जषट्पदी। कथं जातौ दंपती तौ शिवयो: प्रियवल्लभौ ३ केन पुण्यप्रभावेन शिवैकहृदयौ
सदा। कौ तौ पूर्वभवे पुण्यौ तपो वा किं कृतं तयो:४ अनवद्या नाथशर्मा नामानौ केन हेतुना। वदास्माकं यथा पूर्वं संभवं शिवयोगिनौ। इति पृष्टस्तदा सूत: प्राह तान्सत्कथां तयो:। सूत उवाच
शृणुध्वं मुनय: सर्वे दंपत्यो: पूर्विकां कथां। अथाद्येवं गुरु पृष्ट: सर्वज्ञो मनु: पुरा ६ तदा मामाह भगवान्हृष्टस्य बादरायण:। हंसयोर्दंपती पूर्वं मानसाख्ये सरोवरे ७ स्थितौ परस्परं
प्रेम्णा विहरंतौ निरंतरं। सौवर्णा कमलानां तौ नालभक्षणतत्परौ ८ प्रात: [illegible] सायमप्यमू। रात्रौ यामानंतरं च षट्कालं नालभक्षकौ ९ सोवरतटे गावृक्षो न्यग्रोधपादप:
तस्योपरि तयोर्नीडस्थानं ताभ्यां विनिर्मितं १० तत्र स्थित्वा निशायां [illegible] निशायां तौ [illegible] हर्निश्चित:। कुबेरस्तत्रवै नित्यं विहर्तुं याति साऽवल: ११ चिरं विहृत्य संस्नाय वटमूले समाप्नुवसन्। भस्मो
द्धूल्य त्रिपुंड्राक: शिवं तत्र समर्चयन् १२ मधूनाद्यालि स्वनगरे [illegible] सह। तेन नित्यं स्वपूजार्थं लिंगं संस्थापितं पुरा १३ वटमूले पाबदेन निर्मितं रत्नभूषितं। विहारार्थं यदा याति तदा
संपूज्य गच्छति १४ हंसपुंगं प्राते दिनं स्वभ [illegible]। नालपुंज समुत्पाट्य हाटं [illegible] १५ वृक्षोपरि स्वके नीडे स्थित्वा नालं विमोटय च। पुष्पाणि संत्यज्य नालान्संभक्ष्य द्विजदंपती १६
सुखं विहरतुस्तीरं तटे सरसि नित्यश:। हंसाभ्यां संप्रमुक्तानि हेमपद्मानि नित्यश:१७ वटाल लिंगशिरसि पद्मानि प्रपतंति च। काले काले विभो: पूजा घटिता ह्यवशात्तयो:१८ पुष्पपातानंतरतो नालं नित्यं
च भक्षतु:। तेन ताभ्यां पूजनस्य प्राप्तश्च नियमोऽप्युत १९ प्रथमं पूजनं शंभो: पश्चाद्भोजनमित्यपि। एवं लिंगोपरि सदा पुष्पाणि विलसंति हि २० एवं कतिपये काले गते तत्र सरस्तटे। पार्वती परमेशानौ
स्वाकदवशाकृतौ। विहारार्थं समस्तौ रत्नागतौ गगनसंवृतौ। चिरं विहारं तौ कृत्वा वटमूलमुपागतौ २२ तत्र लिंगोपरि तदा पुष्पवृष्टिरभूद्दिव:। किमेतदिति भूतेशं पप्रच्छ नगराट्सुता २३ केनेसौ हेम
कमलवृष्टि: संपात्यते दिव:। न दृश्यते कोऽपि विभो विविक्तेऽत्र सरस्तटे २४ नभस्यपि न कोऽप्यत्र दृश्यते देवयानवान्। पुष्पाणि संत्यक्तं हि द्य विनालानि शिवोपरि २५ सौवर्णानि पतंत्यत्र लिंगोपरि

१-२-४-५ पाठभेद सूर्य० ३ - पाठभेद लक्ष्मण०

पृथक्पृथक् । नाम्नां सहेलत्ता यथा चैकैक नाम पूर्वकं २६ अर्चनं क्रियते केनाप्य पूर्वं हृश्यते तथा । इति पृष्टस्तदा शंभुः प्रहसन्प्राह पार्वतीं २७ शृणु देवि प्रवक्ष्यामि विचित्रा प्राणिनां गतिः । तस्मात्सुखाय कर्त्तव्यं कर्म तस्माद्भवकारणं २८ सत्कर्माण्यपि वा देवि दुष्कर्माण्यपि संस्मृतिः । भोगयित्वा कर्मफलं किंचिच्छेषात्पुनर्जनिः २९ प्राप्यते प्राणिभिर्देवि चक्रभ्रमणवत्पुनः । एवं लोके बहुविधः प्राणिनां कर्मसंचयः ३० पश्यन्न्यग्रोधवृक्षाग्रे नीडपत्रसमुच्चयं । किमस्तीति महालिंगे पुष्पवृष्टेश्च कारणं ३१ तदा देवी समुन्नम्य तद्वृक्षाग्रमपश्यत । नीडांतर्गहनात्पुष्पपातं दृष्ट्वाह शंकरं ३२ स्वामिन्नेतेष्वपि स्त्यत्र नीडांतर्हंसयुग्मकं । पुष्पाणि पातयत्यत्र सौवर्णानि शिवोपरि ३३ पशुपनाथां ईदृशी वा भक्तिः शंभोः सुदुर्लभा । ज्ञात्वा भक्तिं पातयति मोदयाद्वात्र यदृच्छया ३४ वद शंभो प्राणनाथ ज्ञातुं मे कौतुकं महत् । यदि भक्त्या ज्ञानपूर्वमर्चयेत पदं व्रजेत् ३५ स्वभावमोदयादीपि चेद्धेतुरग्रे स्य सङ्गते: अथवा पूर्वं सत्कर्म प्रभावा द्घटते किमु ३६ येन केनापि भावेन तव पूजा सुदुर्लभा । यस्य कस्यापि वा जंतोः स्त्रीणां नात्र संशयः ३७ तस्मादस्यास्ति मे ज्ञातुमिच्छा पक्षियुगस्य वै । केन पुण्येन ते पूजा केन पापेन पक्षिता ३८ तव लीला विचित्रा हि वद मे कारणं स्फुटं । एवं ब्रुवंतीं तां देवीं प्राह मंदस्मितो हरः ३९ शृणु देवि प्रवक्ष्यामि हंसयोः पूर्विकां कथां । मम पूजाप्रभावेण याऽग्रे गतिरेतयोः ४० पुरा श्री पर्वते पुण्ये मल्लिकार्जुनवासिते । भ्रमराख्यया देव्या विहृते शूलपाणिना ४१ तत्रावसच्छिवध्यानी धर्मगुप्ताभिधो मुनिः । त्रिकालं सेवयञ्शंभुं मल्लिकार्जुननायकं ४२ भ्रमराख्यां महादेवीं भक्तसर्वार्थदायिनीं । धर्मगुप्तस्य विप्रर्षे राश्रमे मृगपोतकः ४३ वनाद्भ्रष्टः स्वयूथास्त्सप्राप विप्राश्रमं । भीयातं दृष्ट्वा विप्रर्षेर्यपि दयालुः स्वप्रसन्नधीः ४४ स्वबालवत्तं पुपोष दिव्योदकतृणांकुरैः । एवं कतिपये जाते दिवसे हीनतार्भकः ४५ यत्र गच्छति सोऽपि विप्रो मृगशावोऽनुगच्छति । महालिंगस्य सेवार्थं यदा गच्छति स द्विजः ४६ त्रिकालं सोऽपि तं पश्चात्तु याति शिव सन्निधिं । शिवप्रसादभस्मापि पुण्यं देव्याः प्रसादजं ४७ मृगशावस्यापि विप्रः प्रेम्णा निक्षिपते ततो । एवं स्थिते मृगीं कांचित्सहायामानयन्मृगः ४८ तया सार्कं द्विजस्याग्रे खेलन् तिष्ठति नित्यशः । एवं काले दिने याते मृग्या सार्कं स वै शाक: ४९ स्वभावमूढे तिर्यक्त्वाद्द्राविन्वनमुपाविशत् । मृगैः सार्कं महासाये खेलन्तत्रैव संस्थितः ५० तदा प्रेम्णा धर्मगुप्तस्तस्यादर्शनतस्त्वरन् । वनं सर्वं विचित्वा स न प्राप मृगयुग्मकं ५१ अतीव चिंतासंयुक्तो मृगयुग्मं गतं त्विति । केन वा भक्षितं युग्मं मम चित्तप्रसन्नदं ५२ जलपाने हृदे नष्टमथवा तटिनीजले । वेगेन घृष्टः खातवा व्याघ्रसिंहगजादिभिः ५३ अहो मया दुष्टधिया पालितं तं न रक्षितं । घातदोषो मया प्राप्तः पालनं व्यर्थतामभूत् ५४ एवं विक्षेपचित्तः सन्न्तविवेकेन सांत्वितः । मृगयुग्मं कालपाकान्मृतं तच्चान्यजन्मनि ५५ अज्ञानतः शिवमुनेः क्लेशदं यदभूत्पुरा । तेन पापेन विंध्याद्रौ किरातमिथुनं त्वभूत् ५६ शिवप्रसादे शेषं भस्म स्पर्शाद्देव्याः

१-२-३-४-५-६-७ — पाठभेद सूर्य

प्रसादजात् मुनेः प्रीतिकौ तत्र स्यातां यदि मृगी मृगो ५७ तदैव धर्मगुप्तस्य मम भक्तस्य संगतः। कृतार्थौ मत्पदं यातां तेन साकं न संशयः ५८ तस्यां तावापस्तत्पूर्वजन्म कर्म कर्मविपाकतः। प्राप्तुस्तयो स्तदा देवि
वक्ष्ये तदपि वै शृणु ५९ पूर्वजन्मनि तौ देवि प्रभासे विप्रदंपती। दुर्वृत्तौ चौर्यवृत्त्या तौ स्वकुक्षिंभरौ स्थितौ ६० शंभुविज्ञानवान्नाम शिवज्ञानी द्विजोत्तमः चौर्ये दृष्टौ प्रबद्धौ तौ पीमोच्य घृणानिधः ६१
स्वगृहे स्थापयामास विप्र इत्यभिमानतः। अन्नवस्त्रादिभिः सोऽप्यस्थापयद् गृहकर्मणि ६२ किंचित्कालं तेन सह स्थित्वा सर्वं विदन् गृहे। तत्प्रसादं च संपाद्य पश्चात्कुहकमाचरन् ६३ द्रव्य
भूषण वस्त्रादि सर्वं हत्वा गतौ निशि। गतावरण्ये तत्रस्थ चौरैः सर्वं हृतं निशि ६४ पुनरन्यत्र भिक्षित्वा भ्रमेतां देशदेशके। शंभुविज्ञानवान्योगी संस्मरन्कुधियं तयोः ६५ दयालुर्नैव
चुक्रोध दयया परमार्थधीः। मिथ्याभूतं द्रव्यजातं भ्रामकं क्षणभंगुरं ६६ गतं चेदपि का हानिः स्थितं चेदपि कास्ति मुत्। तयोरज्ञानता शांत्यै प्रार्थयामास मां द्विजः ६७ स्वामिन्नज्ञानवास-
हनौ मुच्येतां वाक्यं त्विमौ। मत्संगं प्राप्य तु पुनर्न विनष्टौ तथा कुरु ६८ मत्सेवां काचिदपि तौ भक्त्या ह्यकुरुतां खलु। तस्याः फलं दापय त्वं मापराधस्य दापय ६९ इति मां प्रार्थ्य योगींद्र
स्तावाशीः संददौ मुदा। एवं महानुभावा हि संति लोके मितमताः ७० आगांसि प्रभुतः कृत्वा तुष्यंति स्वल्पसेवया। ततः परं दंपती तौ कालेन मृतिमापतुः ७१ कल्पायुते रपि तयो र्नोद्धाः कर्मदोषतः।
तथापि मद्भक्तपालना पापहमेतयोः ७२ दत्वा द्विजेभिज्ञानं शुश्रुवान्मम ज्ञानप्रदानतः। उद्धरिष्यामीति पुनर्जन्म दत्तं मृगात्मना ७३ मृगत्वेपि पुराकर्मपाकशेषेण तन्मुनेः। अज्ञानाद्धर्मगुप्त
स्य दुःखं दत्वा गतौ वने ७४ तत्प्रार्थनातिक्रांतौ च परि[illegible] जन्म तदागतः। तस्यापराधदोषेण पक्षित्वं प्रापतुः पुनः ७५ तावेव दंपती चेमौ हंसौ जातौ सरस्तटे। मद्भक्तापराधवर्तनेनैनौ प्रापतुर्मम
पुजनं ७६ अज्ञानादपि मत्पूजा श्रेयो ग्रसं विधास्यति। पद्मनालं भक्षणार्थं स्त्वेतयोस्ति भामिनि ७७ तत्काले पद्मनालान्यादाय सुषमानितौ। स्थित्वा स्वनीडे पद्मानि हित्वा पादेन चंचुना ७८
न्यपातयेतां भूमौ तौ तानि लिंगोपरि तानि च। एवमज्ञातपुरायस्य संदर्भो मज्जनाशिषा ७९ घटितस्त्वेतयोर्देवि तस्मात्सेव्या हि मज्जनाः। मत्सेवयापि यन्नस्यात्मद्भक्तसेवया ध्रुवं ८०।
पश्चैतयोर्गतिः कुत्र पापयोः कल्पकोटिभिः। तादृशावपि मद्भक्तकृपया तारितौ क्षणात् ८१ अग्रजन्मनि चैतौ हि प्राप्नुयातां हि मां शिवे। इत्येवं हंसयोर्वृत्तं श्रुत्वा देवी क्षमाम्बिकाप्यात ८२
आश्चर्यचित्ता देवेश भक्तानां वैभवं स्तवत्। स्वामिंस्त्वद्भक्तवर्या ये त्वद्रूपा एव ते ध्रुवं ८३ अव्याजकरुणापुंजमूर्तयो ज्ञानभंजकाः। कदाचिदुपकारेण तुष्यंते केन वापि ते ८४ शांतसः
प्यपकारतां न स्वात्मवत्तया। पश्य कीदृग्विधो भक्तः शंभुविज्ञानवान्कृती ८५ बद्धौ चौरौ मोचयित्वा स्वगृहे रक्षिता विभौ। तस्यापि कृत्वा कौटिल्यं सर्वस्वं चौर्य निर्गतौ ८६
तथापि तस्य नायातः क्रोधो जातादयैव हि। स्वल्पां कृतां कदाचित्तां सेवामेव हृदा स्मरन् ८७ मत्सेवकौ दुर्गतिं हि निर्भूयास्तां तु भाजने। इति चित्ते दयां कृत्वा त्वां संप्रार्थ्य तयोः कृते ८८

१-२-पाठभेद

अनुग्रहमदात्प्रेम्णा मनः पूर्विणा योगिराट्। तदनुग्रहपुण्येन धर्मगुप्तं मृगो पुनः ॥ प्राप्य तस्य प्रसादेन श्रीशैलेशप्रसादितौ। धर्मगुप्तो ध्येतयोर्वै शिवज्ञानो दयां व्यधात् ९० अज्ञानात्क्रोशतौ जातौ तस्यापि सहवासतः। तदज्ञात क्लेश दानफलं पक्षित्वकारणं ९१ तथापि भक्तवर्यो ऽनुग्रहं बलादिमौ। तिर्यंचावपि ते पूजाह्य तास्यां त्वं जसालभत् ९२ अनया पूजया योग्रकस्यस्त्वदनुग्रहः। तस्मात्त्वद्भक्तसेवा हि स्वल्पापि सुमहत्फला- यात्रा ये वै प्रकुर्वंति धन्यास्ते एव नेतौ। त्वयापि न भवेद्यत्नैः साध्यं त्वत्प्रसादतः ९४ भवान्सर्वहृदिस्थोपि भक्तचित्ते विशिष्यते। संस्मृते नो धृतिर्येषां न तान्जानांति ते ध्रुवं ९५ इति देवं च तद्भक्तान्प्रपूं संती पुनः शिवा। प्रणम्य पादकमले प्राह बद्धपुटांजलिः ९६ स्वामिन्नेतद्धंसयुग्ममग्रे किं भवितावद। त्वत्पूजया नया सम्यग्प्रयत्नप्रलब्धया ९७ एतत्तिर्यग्जन्ममुक्तौ को भवेतामिमौ वद। त्वां वाक्यं समाप्स्येतां शिव येतौ प्रसादतः ९८ इदमेवानयोर्जन्म विद्यते वान्यदप्यहो। विद्यते येदग्जन्म वद तत्कीदृशं विभो ९९ शिव येगौ वचः सत्यं कथं त्यक्तुं क्षमो हसे। अहो त्वद्भक्तमहिमा केन वा वरीतुं क्षमः १०० ब्रह्मविष्ण्वीन्द्रमहिमाप्युच्छिद्यत्यसह- कृद्दशा। गिरिर्दासायते सद्यः समुद्रश्चुलुकायते १०१ मृतश्चायायते काल कैलासः कंदुकायते। कंठलोहायते चक्रं हरेः सर्वा गिरं ह्यपि १०२ चंद्रसूर्यावपि स्वल्पं खद्योतकायते। त्रिमूर्तीनामपि तनुः षाण्मासशिशुकायते १०३ तृणायते जगत्सर्वं तृणं वज्रायते क्षणात्। तस्मात्तेभक्तमहिमा सुसंवेद्यस्त्वयैव हि १०४ न चान्यैः प्राकृतैर्देवि त्वद्भक्तिरसवर्जितैः। एवं देवी महेशं शिवजनमहिमासारमुक्त्वाय चित्ता। शंभुं पप्रच्छ हंसद्वय गतिमपि तज्जन्म भाव्यं च पश्चात् १०५ देवोपि श्रीमहेशो मवददति शयं हंसयोर्भाविजन्म। श्रीशंभो ध्यानयोगात्स्वपदवितरणं स्वात्मना भक्तिदार्ढ्यात् १०६ सकलजनमहाघध्वंसकं सद्रहस्यं गिरिशगिरिसुता सञ्जितं कंचानदंगं। जगदुपकृतिसारं यः शृणोतीह भक्त्या। स लभति शिवधाम क्षाल्यपापौघपंकं १०७ इति श्रीकाशीमूलरहस्ये ब्रह्मवैवर्ते खिलेकाशीकेदारमाहात्म्ये षड्विंशोऽध्यायः २६॥ ऋषय ऊचुः पाराशर्य महायोगिन् शिष्य सूत गुणाकर। पृच्छतीमंबिकां देवो हंसयोः सद्गतिं प्रति। किमाह पश्चात्संशयस्तयोः संसृतिमोचकं। शिवेन स्वात्मपदवी-

अ०२६

१-२- पाठभेद सूर्य०

कथं दत्तान्यजन्मनि २ तत्सर्वं विस्तरेणास्मान्वद सद्गुरुवाग्रसं । यद्रहस्यकथासारश्रवणाद्भवनीरधेः ३ तरामस्त्वत्प्रसादेन कथाश्रवणसेतुना । इति पृष्टस्तदा प्राह सूतो ब्रह्मविदांवरः ४
सूत उवाच शृणुध्वं मुनयः सर्वेऽनवद्यानाथशर्मणोः शिवभक्त्या शिवात्मत्वं प्राप्तयोः शिवयोगिनोः ५ देव्याः प्रश्नानंतरं सः देवः प्राह यथा च तां । शृणु देवीति तां दृष्ट्वा सुदृष्ट्या प्रीतमानसः ६
इमावग्रे भवे देवि भवेतां द्विजदंपती । अवद्यरहिता भक्तिस्त्वयि मय्यपि चैतयोः ७ सुखं शर्मेति लोकेषु वदंति ब्रह्मवित्तमाः । मद्ध्यानानंदशर्मेदं सुखानां नाथतामियात् ८ तादृशं शर्म चैतस्य
प्राप्नोति मदनुग्रहात् । तेनायं नाथशर्मेति नाम्ना ख्यातो भविष्यति ९ अवद्यहीनया भक्त्या त्वयि मय्यपि शुद्धया । ह्येतस्या अवद्यहीनत्वात् अनवद्या भवेदियं १० तेन नाम्ना त्वियमपि ख्याता लोके यशस्विनी ॥ भवेत्त्वत्करुणापात्रमेवमेतौ भविष्यतः ११ एवमेतौ भवेतां हि स्त्रीपुमांसौ सुदंपती । ब्राह्मण्यं प्राप्य मद्भक्त्या त्वद्भक्त्या चानवद्यया १२ अनवद्यानाथशर्माणौ नामानौ ब्रह्मवित्तमौ ।
मत्क्षेत्राणि च सर्वाणि यावंति पृथिवीतले १३ तानि सर्वाणि संसेव्य तत्र तत्रैव मत्कथाः । मत्प्रसादात्कुमारेण श्रुत्वा ज्ञात्वात्मतारणं १४ त्रिकालज्ञानिनौ भूत्वा मायेसन्यस्त
चेतसौ । अहं ग्रहोपासनया विस्मृतस्वात्मभावनौ १५ नाहं देहादि संघातौ शिवोहमिति दार्ढ्यतः । हतप्राक्कर्मसंसर्गौ तथैवागामिकर्मणौ १६ प्रारब्धदेहमपि तौ विस्मृत्यानंदनिर्भरौ । मयि वा त्वयि वा देवि स्वात्मन्यपि जगत्स्वपि १७ अभेदभावना सिद्धा दृढ नित्यसमाधिनौ । भविष्यतस्तदाहं च त्वं गाऽवामा ऽऽबयोर्हृदि १८ निवसाव सदा तेन त्वं चाहं च भविष्यतः । मद्रूपं चैव त्वद्रूपमेतयोः संभविष्यतः १९ उमानाम्ना चानवद्या नाथशर्मा महेश्वरः कैलासे सर्वगतौ पि सेव्यमानो भविष्यतः २० त्वं चाहं चैतयो वृत्ते विलीनौ भक्तमोदिनौ ।
पश्याव स्वात्मविभवं भक्तयोर्दत्तवैभवौ २१ अनेकब्रह्मकल्पांते विष्णोः कल्प प्रवर्तते । अनेकविष्णुकल्पांते रुद्रकल्पः प्रवर्तते २२ तदावयोर्मनो गंतुं महाकैलासमिच्छति । अभेदो
पासनया पृथक् फलमप्येतयोस्तदा २३ उमामहेशात्मभोगकल्पं भुक्त्वा भविष्यति । महाकैलाससदनं गच्छावस्त्वेतयोः सह २४ एतौ भक्तौ नित्यमुक्तौ कृत्वा तत्र शिवांतिके । स्वयं शिवे सोऽपि
पुनेष्यावः कल्पितं जगत् २५ आवयोः क्षणिका लीला नित्या चैव खलु प्रिये । तथापि भक्ततुष्ट्यर्थं कर्तव्या दीर्घकालिका २६ एवमेतौ मत्स्वरूपौ त्वद्भक्त्या संभविष्यतः । भक्ताज्ञाकारिणावावां भक्ततुष्ट्यावयोर्हि मुत् २७ भक्तदुःखादावयोर्हि देवि दुःखं न संशयः । कथं कुर्वे वृथा देवि शंभुर्विज्ञानवद्वचः २८ मद्भक्तश्चोत्तमो योगी शंभुर्विज्ञानवान्द्विजः । मां प्रार्थ्याशीरेतयोर्हि
दत्ता तेन विमुक्तिदा २९ तस्य प्रसादादेवाप्यहं भावनयाचरेत् । उपास्येतां निष्कलं कौतेनेमौ मत्पदाहकौ ३० इत्युक्तं हंसयोर्वृत्तं श्रुत्वा देवी परात्मना । आश्चर्यं हृदया जाता भक्तवात्सल्य भूषिता ३१

१-२-३-४-पाठभेद - सूर्य०

नमस्कृत्य महादेवं हंसौ पूर्णकलापत:। अनुगृह्य महादेवो शिवेन सह तत्क्षणात् ३२ उभौ शाङ्करमाहात्म्यं ययतुर्गणासंस्तुतौ। श्रीमत्कैलासभवनं ब्रह्माद्यैरपि दुर्लभं ३३ तत: कालेन तौ हंसौ

जातौ विप्रगृहे पृथक्। वेदशास्त्रार्थसम्पन्नकुलयोर्योगिनो गृहे ३४ शिवाज्ञया विवाहोऽपि येऽभिनो स्तनयो: पुन:। बभूव काले तौ पश्चाच्छिवपूजाप्रभावत: ३५ अनन्यानाथशर्माणा-

नौ लोकविश्रुतौ। बभूवतु: शिवस्थानान्यनेकानि प्रचेतु: ३६ काशी केदारनेपाल गोकर्णभुवनेश्वरं। श्रीपर्वतत्र्यंबकेश विरूपाक्षगिरीश्वरं ३७ श्रीकालहस्ति श्रीकांची शो-

णाद्रिधूर्धक भंजनं। गोपर्वतेश नर्वनीतेश वृद्धगिरीश्वरं ३८ श्रीमच्चिदंबरसभां ब्रह्मेशं वैद्यनायकं। छायावनश्वेतवनामृतकुंभं त्र्यंबकवनं ३९ वल्मीकं श्रीवांछं मध्यार्जुन

म्मसूनायकं (पंपापुरी वातपुरी सेतुनाथं बलेश्वरं ४० नंदीशं शालिवाटीशं श्रीमहालास्यनायकं) श्रीकंठमाल भूतेश जम्बीश वृहदीश्वरं ४१ श्रीमत्पंचनदं कुंभकोणं

चवटकाननं हिमाचले विंध्यगिरौ सह्ये मलयपर्वते ४२ श्रीमद्गंगातटद्वंद्वे यमुनायास्तटद्वये नर्मदायास्तटयुगे गोदावर्यास्तटद्वये ४३ कृष्णावेणीतटद्वंद्वे क्षीरनद्यास्त-

टद्वये पिनाकिनीतटद्वंद्वे तथा हस्तिपुरीषु च ४४ हिमसेतोर्मध्यसंस्थशिवक्षेत्राणि कृत्स्नश:। सुसेव्य पश्चात्कावेरीतीरमापतुरंजसा ४५ मरुद्वृधातटद्वंद्वे शिवक्षेत्राणि

सर्वश:। संचारप्रश्नेनैतौ ययतुस्ताल काननं ४६ तत्र रात्रौ स्थितं देवं सेव्यतालवनेश्वरं। यस्याङ्कगा जटापिंगा भक्तरक्षणहेतवे ४७ तत्र स्थित्वा शिवं ध्यायन्स्वात्मोद्धा-

रं समीहतु:। तदा तयो: स्वप्नगतस्तेजोरूपजटाधर: ४८ प्राह गंभीरया वाचा सुप्रेम्णा द्विजदंपती। शृणुतं मद्भक्तवर्यौ युवयोर्ज्ञानदं वदे ४९ स्वामी ममापि प्रणवज्ञानव-

क्तास्तिवै शिवौ। इतश्चैव नैऋतभागे कावेर्युत्तरोधसि ५० गच्छतां तत्र युवयो: शिवज्ञानं मदाज्ञया। स्वस्मैदास्यति निर्द्वंद्वं येन स ज्ञानमाप्स्यथ: ५१ इत्युक्त्वांतर्दधे स्वाद्देवो-

रुणाजट: पुमान्। बुद्ध्वा तत्क्षणात् माश्चर्यचित्तौ देवप्रसादितौ ५२ प्रात: स्नात्वा महातीर्थे भस्मोद्धूलितविग्रहौ। त्रिपुंड्रविलसत्फालौ रुद्राक्षानेककंठितौ ५३ पंचाक्षरं हृदि ध्यायन्तु-

द्राध्याय जपाहतौ। शिवयो: सन्निधिं गत्वा सम्प्रणम्य स्तुवन्मुदा ५४ युवयौ राज्ञया देवौ गच्छावस्वामिसान्निधिं। यथावयो: कृपादिष्टो च वज्ञानं गुरु: स्तुत: ५५ तथैवानुग्रहं

देहि येनावां त्वां लभावहे। इति नत्वा प्रार्थ्य देवं देवीं च ययतुर्बहि: ५६ प्रदक्षिणं समावर्त्य प्रार्थयंतौ शिवौ मुदा। अपि प्रहीनस्य समस्तलक्षणै: क्रियाविहीनस्य निकृष्ट

२-४-५-६-पाठभेद सूर्य० १-३-(श्लोकान्तर्गत श्लोक सूर्य० नहीं है

अन्तर्॥ प्रदक्षिणीकृत्य शशांकशेखरं प्रयास्यतः कस्यचनास्ति हि ग्रतः ५७ इत्येवं परिनिश्चित्य तेन मनसा स्कंदे हृदा सस्मार तौ सर्वानपि पौर्वकान्निव जनान्संहितहि भाजोनम-
न् ५८ आचार्यकलशोद्भवादिसुधियां मोक्षैकभाजां सतां संप्रार्थ्यात्मसमुद्धाय यतु श्रीस्वामिशैलं च तौ ५९ शैलं तौ परितः प्रदक्षिणतया गत्वा गुहां गूढगौ बध्वा कोकनदद्युति प्रीतमसौ
सन्नस्य पादौ मुदा ६० स्वामिंस्ते चरणागतौ सकरुणा दृष्ट्या च दीक्षान्दत्त स्वाधीनावनुभावधिनौ गुरुपदं चित्ते सदा कुर्वहे ६१ एवं ताभ्यामशेषप्रणातजनसमुत्तारकस्तारकादिर्भक्ति
प्रह्वानताभ्यां परमशिवसुतः प्रार्थितः प्रेमदृष्ट्या तौ संगृह्याखिलेशः परशिवमहिमासक्तहस्तं समग्रं चित्ते तस्याश्रुवाभ्यां प्रतिफलतु शिवाज्ञा यथादित्यवो चत ६३ एवं तद्[illegible]मा-
न्नक्षणमखिलशिवज्ञानमानंदबोधं प्राप्यैतौ नित्यतृप्तौ गुरुचरणयुगं सम्यगानम्य भक्त्या देहमात्रादिसंघाखिलमपि मनसा सद्गुरोरर्पयित्वा स्वेच्छासंचारसाधनतावपि पतौ
सद्गुरोः प्राप्य यातौ ६४ आचार्याज्ञां प्रगृह्याखिलपरमशिवक्षेत्रजातानि दृष्टुं यांतौ तावाह देवः शृणुतमपरमित्याह वाक्यं कुमारः पूर्वं जातौ युवाभ्यां परमशिवमुनेश्चापराधस्तु दोषः
काशीकेदारयोर्वा यदनमनुभजध्वास्तत्परं वां शिवाप्त्यै ६५ [illegible] स्वामिमूर्तिं हृदयसरसिजे सन्निधाय प्रकृष्टां देवक्षेत्रोक्तपुराणान्यखिल[illegible]कथाः संवदंतौ मिथस्तौ तत्तत्क्षेत्रेषु
वासं कतिपयदिवसान्लभ्य तत्तत्कथाभिः पुण्याभिर्नीय कालं च समुपगतौ काशीकेदारभूमिं ६६ विश्वेशादीनि सर्वाण्यखिलदिविषदां मूर्तिसंघानि लिंगान्येकादशानि तीर्था-
न्यविकलफलदस्नानवाप्यादिकानि पंचक्रोशस्थलिंगान्यपि च दिविषदः सेव्य भक्त्या प्रपूज्य प्राप्तौ केदारलिंगं परशिवपददं तीर्थमप्यादरात्तौ ६७ तत्राद्यैतीर्थवर्ये निय-
मितविधिवत्स्नौ स्वसर्वापराधं प्राग्जन्मन्यात्मदोषं मुनिजनकृतकं त्यज्य शंभोः प्रसादान्नैर्वाणीं दीव्यदीक्षां गुरुवदनसरोजोपदिष्टां यथावत् ६८ संसाद्य श्रीमहेशे विनिहित
हृदयौ स्थाणुवत्तौ समाधिस्थौ तैलधारावदच्छिन्नभावनातुष्टमानसौ शिवाशिवौ दिव्यदेहौ स्वकौ दत्वा तयोर्मुदा त्याजयित्वा प्राक्तनौ च देहौ काशीभुविस्मरणात् ६९ [illegible] स्वांशेन
तस्मिन्प्रविश्य तयोर्देहे शिवाशिवौ तौ यथा स्वात्मपदवीं लभेतां गतसंशयौ ७० तथा कौ तन्महादेवो रुद्रकल्पावधी स्वौ पार्वतीपरमेशानौ जातौ तत्क्षणमेव तौ ७१ अहं ग्रहो वासनया

१-२-३-४- पाठभेद सर्गे

ह्यन्वद्या शिवाख्यौ। तथैव नाथशर्मापि शिवोऽभूच्छिवशासनात् ७२ अद्यापि रुद्रपदवी सास्याभेवानुभूयते, कल्पान्ते मुक्तिरनयोः स्वात्मभूता विलासिका ७३ एवं केदारकृपया

काश्यां मुक्तौ च दंपती। अपारा शिवयोर्लीला भक्तचित्तप्रसादिनी ७४ शृणुत मुनिधीरेन्द्राः सद्गुरुर्मामवोचत् परमशिवरहस्यं प्राक्तनं वेदसारं। तदखिलमपि सोऽहं नाथशर्मा त्वद्या

गतिमपि जनतारं प्रोक्तवान् ध्वस्तपापो ७५ धन्या यूयं कृतार्थाः परमशिवकथासारभूतं भवद्भिः पीतं कर्णाञ्जलिभ्यो हृदयभुवि विशालालवालं प्रविष्टं। तेन ज्ञानांकुराणां प्रभव

मपि भवेन्मायिका वृष्टिजातं दुर्भिक्षं ह्यविरनिर्भूयेत्फलमपि लभते श्रीशिवज्ञानपक्वं ७६ धन्योऽहं युष्मदीयप्रबलतरमहाप्रश्नतः संजाता वक्तुं चेच्छापि तेनामृतरसघटिका सद्गु-

रुस्यत्य शंभोः यच्छ्रुत्वा न प्रयांति प्रचुरतरमहादुःखसंसारवार्धिं लोकास्त्रैलोक्यपूज्यं वयमनिशमुमाकांतपादं भजामः ७७ मुनय० श्रुतं त्वत्तः सर्वं परशिवकथासारमखिलं क्वचिच्छिन्न

प्रस्थानवदभिदधास्त्वं शिवकथाः। तदास्माकं भ्रान्तिः किमिति भवतः पुराणकथने कथा पौर्वापर्यं नजगति भिदेति प्रभवति क्वचित्क्षेत्रे भेदः ७८ क्वचिदपि च भक्तोद्धृतिविधौ क्वचिद्ब्र

४ विप्राग्रजनौ। क्वचित्तीर्थोत्सवौ क्वचिदपि विधेः सृष्टिविषये कथं पौर्वापर्यं नियममभिजानीमहि?

ह्नोत्पत्तौ क्वचिदपि विधेः सृष्टिविषये कथं पौर्वापर्यं नियममभिजानीमहि वद तः ७९ पुराणानां वक्ता त्वमसि निखिलानां खलु सुधीः प्रभेदः केनासौ वद किमभवोद्धन्यपथतः।

जगत्सर्वं सत्यं निखिलमितिहासोक्तकथनं पुराणानि प्राचीह्यपि तदुदिताश्चापि सुकथाः ८० भिन्नभिन्न कथिताः क्वचित्क्वचित् प्रोद्भवप्रलयभक्तसत्कथाः। क्षेत्रतीर्थवरदानभेदतो

नोदयाः शृणु हृदि संशयं विभोः ८१ सूत उवाच कल्पे कल्पे शिवस्य ह्यनेकवदमिता दिव्यलीला विचित्रा याया पूर्वं बभूवुः। श्रवणसुखकरास्ताः पुनस्त्वन्यकल्पे ब्रह्माद्याः स्थावरांताः

स्वकृतसुकृतसत्कर्मपाकेन भिन्नाः पौराणोक्ताः कथाश्च प्रथितविविधसात्यथतस्तास्त्वभिन्नाः ८२ सर्वं सत्यं च शास्त्रं विविधकृतिभिदाभेदितं चापि शंभोस्तात्पर्यं चैकरूपं विमल

सुमतिभिर्ग्राह्यसारं यद्ध्या। यावद्भेदेन जाताऽप्यतुलितमहिमा चैकरूपा प्रतोतुस्तत्सारं ग्राह्यमोघा विनिहितमतिभिः प्राह चैवं गुरुर्मां ८३ निःसंशयं जानत विप्र

अ०२१

७४

१-२-३-४-५-६ पाठभेद सूर्य०

वर्याः सर्वं कथासारविचित्रजातं। भक्तिप्रबोधं शिवधामदायि शृण्वंति ये ते शिवमेव यांति ८४ इति श्रीकाशीमूलरहस्ये ब्रह्मवैवर्ते खिले काशीकेदारमाहात्म्ये सप्त-
विंशोऽध्यायः २७ ऋषय ऊचुः सूत शंभो ज्ञानसारनिधे त्वन्मुखपंकजात्। श्रुतमस्माभिरीशस्य रहस्यं लोकतारकं १ श्रीमत्केदारनाथस्य भक्तवश्यस्य शूलिनः
प्राचीनमणिकर्णीयं च प्रभावमुत्तममद्भुतं २ श्रीमद्विश्वाधिनाथस्य मणिकर्णी च वैभवं नित्ययात्राविधानस्य ढुंढ्यादीनां च वैभवं ३ ओंकारादिमहालिंग-
मूर्तीनां दिव्यवैभवं। ज्ञानवाप्यादितीर्थानां प्रभावातिशयं परं ४ पंचक्रोशस्थलिंगानां गणानां च महेशितुः। प्रभावमद्भुतं शंभोर्भक्तानां शिवयोगिनां ५ शिवा-
पराधभ्रष्टानां कल्पांत पापभोगिनां। शिवप्रसादतः प्राप्तं रहस्यं सर्वतारकं ६ शिवापराधो दुर्लंघ्यः श्रुता तस्यापि निष्कृतिः। तस्मात्केदारनाथस्य कृपालोक-
विलक्षणा ७ धन्या वयं यतः शंभो रहस्यं श्रावितं त्वया। कति वारं वयं काशीं यात्रार्थं भक्तितो गताः ८ अद्भुतं न श्रुतं त्वेवं केदारेशस्य वैभवं। प्राचीनस्यापि तीर्थ-
स्य रहस्यं शिवभाषितं ९ तस्मादिदानीं गच्छामस्त्वया सार्कं महामते। दर्शयास्मान्तीर्थवरं केदारेशं घृणानिधिं १० स्नात्वा केदारमभ्यर्च्य कृतार्थाश्च भवामहे। त्वमे-
व तारकोऽस्माकं रहस्यं श्रावितो यतः ११ इति सर्वे मुनिगणा नैमिषारण्यवासिनः। शौनकाद्या महाभागाः शिवज्ञानैकसागराः १२ सूतेन साकं सहसा काशीमुद्दिश्य नि-
र्गताः। केदारेशं विश्वनाथं मणिकर्णीं द्वयं तथा १३ भक्त्या हृदि स्मरंतस्ते प्राप्ताः काशीं मनोजवाः। स्नात्वा च मणिकर्णीयां ते विश्वनाथं समर्च्य च १४ ओंकारा-
दीनि लिंगानि ढुंढ्यादींश्च समर्च्य च। ज्ञानवाप्यादितीर्थानि स्नात्वा संस्था विधानतः १५ पंचक्रोशं परिक्रम्य प्राप्ताः केदारसन्निधिं। प्राचीनमणिकर्णीं ते पूज्य सस्नुर्यथाविधि १६

१ - पाठ भेद सूर्य०

श्रीमत्केदारनाथं च संपूज्य विधिवद्द्विजाः। आनंदवारिधौ मग्नाः सूतेन सह भूसुराः १७ श्रीमत्केदारसविधे न्यषीदन्सूतसंयुताः। तत्कथालापसुमुखाः सूतमूचुर्मुनीश्वराः
१८ अद्य धन्या वयं सूत फलितं नस्तपःफलं। त्वयोक्तस्य रहस्यस्य सारमेतद्ध्रुवं भुवि १९ प्राचीनतीर्थं केदारलिंगं चातीव दुर्लभं। अस्मद्दृग्गोचरे जाते तीर्थलिंगे च पुण्यतः २० तस्मा-
त्काशीक्षितौ प्राप्तं इदं नः सुमहत्फलं। यत्र नास्ति महाक्षेत्रे भैरवी यातनापि हि २१ स्थास्यामोऽत्रैव निर्मुक्ता यावज्जीवं शिवांतिके। इति निश्चित्य ते सर्वे मुनयः सूतमब्रुवन् २२
काचिद्विवक्षा नः सूत विद्यते तामुदाहर। श्रुत्वा त्वद्वदनांभोजात् भवाम हतसंशयाः २३ धर्मप्रदानि स्थानानि संति लोके बहूनि च। अर्थप्रदानि स्थानानि संति शंभो बहूनि च २४
कामप्रदानि स्थानानि तथैवान्यानि संति च। मोक्षप्रदानि स्थानानि तथैवेशस्य संति नैः २५ धर्मार्थकाममोक्षाणां युगपत्संप्रदान्यपि। स्वं शंभोः परेशस्य तत्तत्फलकराणि च
२६ काश्यादि पुण्यक्षेत्राणि संति लोके प्रसिद्धये तीर्थान्यपि तथा लोकवांछासत्फलदानि च २७ पुष्करादीनि लोकेषु वापी कूपसरांस्यपि। तथैव नद्यः पुण्योदा गंगाद्या लोकविश्रुताः २८
पापक्षयकराश्चापि चतुर्वर्गफलप्रदाः। तथैव शिवलिंगानि संति स्वायंभुवानि च २९ दर्शनात्पूजनाच्चापि चतुर्वर्गप्रदानि हि। काशी विश्वेश्वरादीनि संति दिव्यानि भूतले ३०
मूर्तयोऽपि तथा दिव्याः पुण्यक्षेत्रगताः पराः। विघ्नेशदुर्गाविष्ण्वादि बहुभेदविभेदिताः ३१ पापक्षयकराश्चापि चतुर्वर्गफलप्रदाः यासां च दर्शनात्ध्यानात् वंदनात्पूजनादपि ३२
लब्धवांछा भवंत्येव जना मुक्ता अपि क्वचित् (एवं लोके शास्त्र दृष्टतीर्थक्षेत्रेषु देवते ३३ वांछितान्यपि सिध्यंति मुक्ता अपि क्वचित्क्वचित्) अस्तु वांछाप्रदातृत्वं मुक्तिः
सा कीदृशी वद ३४ अविद्यावासना जाल पाशबद्धा ह्यनादयः। जीवास्तादृग्विधा मुक्ताः स्वात्मज्ञानं विना कथं ३५ अनेकजन्मसुकृतपरिपाकवशान्नृणां।
वेदांतश्रवणे श्रद्धा भवतीति श्रुतेर्वचः ३६ श्रवणान्मननं श्रद्धा तन्निदिध्यासनं ततः। आत्मा वारे तु द्रष्टव्यः श्रोतव्यः श्रद्धया पुनः ३७ मंतव्यश्च निदिध्यासितव्य
इत्याह वै श्रुतिः। तदर्थबोधकः शंभुरेव नान्यो हि वै गुरुः ३८ तस्मिन्भक्तयाश्च हृदयानऽन्यया कालपाकतः। आगामिसंचितानाशः कर्मभोगो गुरोर्बलात् ३९ प्रारब्धमात्रं

अ०२९

१- पाठभेद लक्षण०   २- यह श्लोक पूर्ण० नहीं है

शिष्टःसन्त्वेतदितिगुरोर्वचः। यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ४० तस्यैतेकथिताह्यर्थाः प्रकाशंतेतिश्रुतिः।सम दुःखसुखःस्वस्थःसमलोष्टाश्मकांचनः४१ तुल्यमानापमान

श्च धीरस्तुल्यारिमित्रकः। वृत्त्याजगत्यातिष्ठन्याक्षत्प्रारब्धसंक्षयः४२ प्रारब्धक्षयतत्कालमात्रेवपीलीयते। नचोत्क्रमोनगमनंजीवाहमितिभावना४३ तादृग्जीवस्यैवमुक्तिर्ना-

न्यस्येत्यवदच्छ्रुतिः।एतादृशयोग्यता कुत्रप्राणिनां प्राकृतात्मनां४४ मुक्तिर्वाकीदृशी तेषां मुक्तेर्भेदोस्तिवापृथक्।एतत्संशयनिर्णीदं कुरुसत्महामते४५ इतिपृष्टस्तदासूतोमुनिभिर्ब्रह्म

वादिभिः। तदाकारुणिकंशंभुं गुरुंध्यात्वाहतान्पुनः४६ शृणुध्वंमुनयःसर्वेसत्यंवक्ष्येगुरोर्वचः।युष्मत्प्रश्नसमाधानवक्ताविश्वेशएवहि४७ तथापिमद्गुरुर्वाक्यमुपदिष्टमहंवदे।

समर्थःपरमेशानःस्वयमेवाखिलेहृदि४८ प्रविश्यलीलांतन्वानःस्वशक्त्याखिलहृद्गतः।स्वात्मभूतस्यजीवस्यस्वशक्त्याभेदितस्यच४९ स्वशक्त्यैवपुनःस्वस्मिन्मेलितुंकाविलंबना

अकर्तुमन्यथाकर्तुंकर्तुंयोग्यप्रभुःशिवः५० अस्त्येवस्वात्मकेजीवेस्वात्मज्ञानंनिरंतरं।स्वशक्त्याविहितभेदज्ञानमात्रनिरासनं५१ ततस्यचकियत्कार्यंस्वाभाविकमितीर्यते।परिपूर्णःपरानं-

दःसर्वत्रास्तिनसंशयः५२ यत्रयत्राहभगवान्मुक्तिस्थानेषुतारकं।तत्रदेवस्यलीलेयंनामरूपविमोचनी५३ तदन्यत्रस्वकालीलानामरूपाभवत्विति।भोगार्थमितिचाप्यन्येलीलार्थ

मितिचापरे५४ एषदेवस्यमहिमाजगज्जीवात्मिकास्वकातस्मादत्रनसंदेहोनकर्तव्यःकदाचन५५ अनेककोटिजीवानांराशिभेदेनभेदिता।लीलादेवस्यमुनयस्तेषुवैजीवकोटिषु५६

शिवप्रसादसत्क्षेत्रतीर्थेषुकृतिसंततिः।पंचाशतकोटिविस्तीर्णायोजनाभूःप्रमाणिका५७ आपातालब्रह्मलोकमध्येपिप्राणिनांकुलं।भूमावपितमस्तायांप्राणिनांपूर्णंसदा५८ तादृशेवसु

विस्तारेकियदेहप्रसादजं।भूप्रदेशस्थलंविप्रास्तस्मिन्वाकृतिजीवकाः५९ मुच्यंतेकर्मवशतःप्रसादात्परमात्मनः।तत्रापितारतम्यो स्तिमुक्तेर्भेदःपृथक्पृथक्६० पापमुक्तोमुक्तिरिति

ख्याताकेषुस्थलेषुचित्।अथवाकेषुचित्ख्यातासालोक्यामुक्तिरुत्तमा६१ केषुचिच्चैवसामीप्यासारूप्याकेषुचित्स्मृता।नियम्यत्वंनियंतृत्वंयावज्जीवेशयोःस्थितं६२ तावन्मुक्ति

र्नसायुज्याइतिवेदांतनिर्णयः।स्वर्गादिलोकसालोक्यसारूप्याद्याश्चमुक्तयः६३ पुनरावृत्तिसहिताःकाश्चित्काश्चिन्नावृत्तिदाअपि।इत्यादयोमुक्तिभेदामुक्तिस्थानेषुसंतिवै६४ एतेषुमुक्ति-

प्र०वै० ७६ का०के०मा

स्थानेषु तारतम्यात्स्युर्मुक्तयः । शिवप्रसादो येष्वस्ति तेषां वृत्तिः पुनर्नहि ६६ अथवा प्यस्ति चेत्तत्रापि काशी प्राप्तिकरा ध्रुवं । काशीप्राप्त्यैव वा भवेत्तानो चेत्तत्रैव च क्रमात् ६७ हाङ्गायन्त्ये
च कुर्याति शिवे ब्रह्मणोत्सोदिताः । सालोक्यसामीप्यभाजः सारूप्यमपि ते क्रमात् ६८ समृतिष्वं ते च कामास्तेषां संकल्पमात्रतः । चिरकालं तथा भुक्त्वा कामान्संकल्पमात्रजान् ६९
क्रमेण तेषु वैराग्यं प्राप्य कामेषु तेन ना । सर्वं तुच्छमिति ज्ञात्वा परं ब्रह्मणि तल्लयनं स्वयमात्मानुसंधानात्सायुज्यां मुक्तिमाप्नुयुः । तादृशी मुक्तिरत्रैव काश्यां सद्यो न संशयः ७०
यथास्थानविशेषेषु विविधा मुक्तिरीरिता । न तादृशी मुक्तिरत्र काश्यां मुक्तिर्विलक्षणा ७१ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं । यस्मिन्याति लयं सर्वं तदेवात्रस्थ जंतवः ७२
तदात्मका भवंत्येते इति वेदानुशासनं । काश्यां कृताघजीवानां मुक्तौ नैव यातना ७३ तत्रापि क्षणायते शंभोस्तारकादेशहेतुतः । प्राणोत्क्रमणमात्रेषु जंतोरत्र सदाशिवः ७४
व्याचष्टे तारकमिति श्रुतिराह सनातनी । कोन्यथा कर्तुमीशस्तां भोगस्यावसरः कुतः ७५ पश्यत ब्राह्मणाः शंभोः प्रसादोत्रास्ति कीदृशः । अवश्यमनुभोक्तव्या भैरवी यातना यदि ७६
सापि तत्क्षणा एवात्र जंतोरुत्क्रमकालगा । प्रदृश्यते भुक्तवत्ता मायया परमेशितुः ७७ क्षणं युगायते जंतो युगमर्धं क्षणायते । परेशमायया सापि लोकभीतिप्रदायिनी ७८ धर्मलो-
के यथा तस्माद्दुसत्क्षेत्रबलाज्जने । तथा शिवानुग्रहात्सा यातनेति भयप्रदा ७९ सास्त्वथा मास्त्वथा काश्यां केदारे नास्ति संशयः । आज्ञाबलवतो शंभोः प्रत्यक्षा शास्त्रचोदिता ८० अ०२८
तस्माच्छिवक्षेत्रजातं कियद्ब्रह्मांडमंडले अतिस्वल्पादतिस्वल्पं समुद्रे परमाणुवत् ८१ तत्रास्था जीवा मुक्ताः स्युः केत्सृष्टौ काहानिरीशितुः । ब्रह्मज्ञानेनैव मुक्तिर्नान्यथेति श्रुते-
र्वचः ८२ सत्यमेव न संदेहस्तादृक् ज्ञानं शिवाज्ञया । तत्क्षेत्रे संभवत्येव प्राणिनामुत्क्रमे ध्रुवं ८३ शिवात्मब्रह्मविज्ञानान्मुक्तिर्युष्माकं सुसंमतं । तथै-
वास्मद्गुरुरपि क्षेत्रेषु श्रुतिसंमतं ८४ ज्ञानप्राप्तिं प्राह शंभोः प्रसादाच्छास्त्रसंमत । ब्रह्मज्ञानावाप्तिरपि मृतिरप्युत्तमस्थले ८५ विना शिवप्रसादेन कथं ल- ७६
भ्येत जीविभिः । तस्मादत्र तु संदेहो नैव कार्यो भवादृशैः ८६ काशीमुक्तिः सत्या केदारे सा विशेषतः । केदार इति नामापि वक्तृणां श्रेयसंपदं ८७ तस्मिन्ना-

१-२ - पाठभेद मू०

मनिसूक्ष्मार्थो ह्यस्ति शृणुत भूसुराः। हेतुनायेन तन्नाम्नि प्रभावो लोकतारकः २८ केदारनाम जगतित स्योत्पादनभूमिषु। प्रसिद्धं तत्कथं तत्र शिवक्षेत्रोपपादितं २९ इत्येवं मद्गुरुः पूर्वं मया पृष्टो दयानिधिः। तदा मामाह भगवान्व्यासस्तदपि वो वदे ३० धन्या यूयं यतः शंभोः सन्निधौ मामपृच्छथ। फलेशस्य कृपया विचित्रार्थाः स्फुरंति मे ३१ गुरोः प्रसादो बलवान्प्रसंगान्मां सुबोधयति। एवं योगींद्रवर्यैर्मधुररसयुतैः पुराय सल्लापवाग्भिः संपृष्टः शंभुभक्तस्तदुचितभगवत्सत्कथाभिश्च सूतः उक्तिप्रत्युक्तिसारप्रचुरमधुरया सत्यवाचा स तेषां मानं दाब्धिं प्रहृष्य प्रचुरशिवकथासारपूर्णस्तु सस्ते ३२ सत्संगः किन्न कुर्याज्जगति जनिमतां धर्मकामार्थमोक्षान् संदास्यत्यं जसान्यत्किमिह बहुतरं तपो वा यपुरायं। पुण्यम् सत्संगतो मे फलितमभिमतं काशिकेदारभूमौ शंभोः प्रत्यक्षदिव्यामृतरसवचनं मद्गुरोर्भक्तिरूपं ३३ इति श्रीकाशीमूलखंडे ब्रह्मवैवर्ते [illegible] काशीकेदारमाहात्म्ये अष्टाविंशोऽध्यायः २८॥ ऋषय ऊचुः सूत शैव रहस्यज्ञ शिवज्ञानैकसागर। त्वया श्रुतं श्रीकेदार[illegible] २ केदारेश इति ख्यातिः शिवस्य परमात्मनः। हेतुना केन संप्राप्ता आनुपूर्वी च सा कथं २ तद्रहस्यं वदास्माकं श्रोतुमिच्छावतां च नः। इति पृष्टस्तदा सूतः प्राह तान्मुनिपुंगवान् ३ सूत उवाच शृणुध्वं मुनयः सर्वे रहस्यं परमेशितुः। वामदेवाय कथितं कुमारेणार्षिणा पुरा ४ तदेव चानवद्यार्थं कथितं नाय धर्मवित्। पुरा शंभुं समाराध्य हिमवान्गिरिनायकः ५ तपश्चचार सस्त्रीकः शरदामयुतं दृढं मेर्वादिगिरिवर्येषु स्वाधिक्यं प्रार्थयन्यशः ६ न भवेन्मेनगाधिक्यं सर्वथा प्रार्थनां विना। अहं जडः कथं शंभुः प्रसीदेत्स इति प्रभुः ७ असंपाद्य महेशस्य प्रसादं न तपस्त्यजे। इति निश्चित्य च दृढं वायुभक्षस्तपो चरत् ८ अयुताब्दं गते त्वेवं भक्तरक्षो महेश्वरः। प्रसन्नः प्राह कृपया हिमवंतं च तावलं ९ वरं ब्रूहि नगाधीश स्वामी त्वं भार्यया सह। दास्यामि ते भिलषितं तपसा तोषितोऽस्म्यहं १० इति शंभुवचः श्रुत्वा सस्त्रीको हर्षगद्गदः। हिमवान्संप्रणम्येशं स्तुत्या संस्तोतुमारभत् ११ जय जय जग-

१-पाठभेद सूर्य०

दाधार प्रणताभीष्टद भक्त सर्वस्व । जयजय करुणा सिंधो त्रिगुणातीत सगुण सर्वज्ञ १२ आपदि किं भजनीयं नमनीयं चरणयुगलमीशस्य । तन्नमनं किं कुरुते श्रीशादीनपि किंकीकुरुते १३ मूर्तिर्वो ससुप निषण्णमाहूतस्तु चंद्रमानौमि । मच्चेतोवासकृन्नि विहृतसांवः स सर्वज्ञः १४ सत्यं ज्ञानमनन्तं ब्रह्म गुहानिहितमिति योवेद परमे व्योमनि सर्वान्सो श्नुते तेन सह सर्व कामान्तस्मादेतस्मादात्मन आकाशवायुतेजो बन्न्यादिः सृष्टिः सर्वा पुनरपि संस्थितिलयमायाति चिद्घनानंदे तत्सत्यं ब्रह्म शिवं त्रिगुणविलासमत्पुतः १५ धन्योहं पुण्य विपाकः प्रतिफलितो मेद्य पूर्वीकः । मेने कृतबहु पुण्यं मेने त्वामानमाशु चरणयुगे दीनावनदक्षसर्वेश्वर्य सानंदं योगिहृद्गतेशंभो १६ हर मृड चंद्रचूड शिव शंकर भर्ग भव स्मारहर भूतनाथ विषमेक्षण विश्वपते । पुरहर कालकाल पुरतो भवतस्त्वबुतामिति च भणन प्रणमन्न जनकाहिगिरिकस्य धुरि १७ इत्येवं निज धर्मदार सहितः स्तुत्वा तुषाराचलः साष्टांगं प्रणिपत्य सामदपितरं स्वांतः समुद्रं चिता । सानंदं पौनतनमद्रि वंशतस्तं देहभानं विना सत्त्रीकं परमेश दर्शनभवाभीष्टार्थ दाप्तोतदादेवेशं वरदं प्रसन्नमृगराडिस्थं वरं प्रार्थयत १८ देव त्वत्करुणाकटाक्ष विसृतैः पात्रं च जातो ह्यहं सर्वज्ञ स्त्वमशेष जीवहृदयावासस्त्वमेवाश्रयं । मच्चेतोगत माशु पूरय विभो जानन्वरं देहि मे एवंवादिनि भूधराधिपवरे शंभुः कृपासागरः १९ प्रोवाचाखिलजीवसंततिमनोभावस्य वेत्ता प्रभुः जानेहं तव हृद्गतं नगपते श्रेष्ठं नगानां यथा त्वां जानीयुरिमे ममापि च भवान्पूज्यस्तथा कार्येमत्पूज्यो मम भक्त एव नृपास्त्वं भक्तिभाजां वरः २० तस्मात्ते शिखरे वसामि बदरीनामोत्तमे स्वाश्रमे कालेन त्वयि जन्म भूरिति जगन्माता पराशक्त्यपि । व्याजेन प्रतिथास्यति स्वपितरं पौर्वं जिहासेच्छया तां पुत्रीं परिभाव्य लोकजननीं तुष्टिं परां यास्यथः २१ सर्वैर्देवगणैर्द्विजैर्गिरिवरैः पूज्यौ युवां दंपती देव्याः पाणिपरामृशेन च मयाप्यत्यंत पूज्यौ युवां जायेथा । दुहितास्य कल्पावगमे मुक्तौ च मां यास्यथः इत्येवं परमेश्वरो नगवरं दत्त्वा वरं तद्द्वौ २२ स्वावासं च चकार तत्र बदरीनामाश्रमे ह्यादरात् तल्लिंगं मधुसूदनो नरश्च पुनर्नारायणाख्यं वपुर्द्वेधा भूच्च सुपूजितं प्रतिदिनं संपूज्यतस्थौ गिरौ । तल्लिंग—

१-२ - पाठ भेद सूर्ण०

स्य च दर्शनाज्जनि मतां तद्यस्तनुत्यागतः २३ मोक्षस्तल्लक्षणमेव योगि विभुतः प्राप्तो यदा भूधरे लोकास्तन्महिमा विशेषममलं श्रुत्वा ह्यनंता गताः। शंभोर्धाम वदाजैर्नभूच

विदिता साभूश्च मोक्षाकरा मोक्षानंद निरंतरा निबिड मत्तस्यां कृपाणां मयं २४ केदारः परमेश्वरावसथभूः प्रालेयशैलोपरी धर्मार्थाखिलकाममोक्षसु महासस्यानि सूते

फलं। केदारोत्र गिराविति प्रथित सत्कीर्त्यास्त्वकृता भूजैनैः २५ तदा प्रभृति केदारमिति ख्यातं हिमाचले। धर्मार्थकाममोक्षाख्य फलसस्यांकुरांकरं २६ क्षेत्रं

केदारमिति तत्प्रथितं परमेशितुः। बहवस्तत्र योगीन्द्रा मुक्तिं प्रापुः शिवं भजन् २७ अद्यापि मुक्तिदं क्षेत्रं महाप्रस्थान संज्ञकं। तन्मार्गगत जंतूनामपुनर्भव मुक्तिदं २८

महाकैलाससदने यदा ब्रह्मागतः पुरा। दहास्य महालिंगान्नु त्वान्दृष्ट्वा समागतः २९ केदारदर्शनाकांक्षी न ददर्श शिवं पुनः। पश्चाद्धावं वृषभ महिषवृंदे

देवं यथालभत ३० तदा प्रभृति प्रत्यक्षदर्शनं लिंगरूपिणः। न प्राप्तं च जनैस्तस्मात्सद्यो मुक्तिर्गता तदा ३१ ये केचित्तत्र मनुजास्त्यक्तदेहाश्च मत्स्थितौ। ते यांतु

मत्पदं नान्यतीर्थरतो दयानघः ३२ एवं शंभुर्वरं दत्वा काश्यामाविर्भवो हरः। केदारलिंगरूपस्य जनानां दर्शनं ददौ ३३ धर्मार्थकाममोक्षाणां काश्यां के-

दारभूमिका। सस्यवृद्धिकरी जाता विश्वेशनगरीबलात् ३४ काशी सर्वप्राणीनां वै मोक्षदापि शिवाज्ञया। तत्र केदारभूः श्रेष्ठा यतो

हिंसा न भैरवी ॥३५॥ एवं चतुर्वर्गसस्य प्रदा केदारभूमिका। हिमाचलस्थात्केदारात्काशी केदार उत्तमः ॥ ३६ ॥

यस्मात्साक्षाल्लिंगमूर्तिः काश्यामाविर्बभूव ह। हित्वा हिमाद्रि केदारं विश्वेश करुणा बलात् ॥ ३७ ॥

तस्मान्मोक्षाख्य सत्यस्य केदार इति वै प्रथा। एवं केदारनामा भूक्षेत्रं काश्यां तथा गिरौ ३८ हिमागकेदारमोक्षः महाप्रस्थानयानतः। काशीकेदारमुक्तिस्तु ह्य-
नायासेन सिध्यति ३९ महाप्रस्थानगमनं दुर्घटं भुवि देहिनां। तुषारशैत्यशैल्यभग्नसंध्यस्थिस्नायुचर्मणां मृहा ४० हिमं प्राप्य तत्र नृणां मुक्तिर्महापथे। का-
श्यां केदारभूमौ तु न तथा देहयातना ४१ अनायासेनैव देहत्यागमात्रेण तारकं। उपदिश्य महादेवः करोति स्वात्मवत्क्षणात् ४२ श्रीकालभैरवाद्यास्तु काशीस्था
देवतागणाः। तूष्णीं पश्यन्ति मुक्तं तं जीवं चित्रार्पिता इव ४३ रहस्यं विश्वनाथस्य को जानातीति संस्तवन्। पंचाशत्कोटिविस्तीर्णा भूमौ काशी विलक्षणा ४४
पंचक्रोशात्मिका सर्वलोकानां मोक्षदा ध्रुवं। तथाप्यत्राविमुक्तानामस्मदाज्ञावशागतिः ४५ भैरवाज्ञां विना देवो न पुनस्त्यात्मधाम हि। केदारान्तर्गृहे स्माकं नैवाज्ञा
संप्रवर्तते ४६ तस्मात्काश्यामपि तरां पृथक्केदारमंडलं। धन्या येऽत्र मृता जीवास्त्वस्मदभ्यो वलवत्तराः ४७ शिवप्रसादो वलवान्केन शक्यो निवारितुं। यावद्रहस्यं नाज्ञा-
नन्जनाः केदारभूगताः ४८ तावद्देवास्मदाज्ञा काश्यां भाति गरीयसी। शिवाज्ञापि तथैवास्ति अज्ञा लोकान्न जायते ४९ यस्मिन्मेनुग्रहः पूर्णस्तस्यैवात्र मृतिर्भवेत्।
तस्मात्काशी भुवि विशेषे वैलक्षण्यमिहास्ति हि ५० इति संतुष्टहृदया मोदंते भैरवादयः। एवं वै मुक्तिसत्यस्य केदारं श्रुति निश्चितं ५१ रहस्यं परमं गोप्यमिति ब्रह्मविदो
विदुः। एवं केदारनाम्नो वै प्रवृत्ता शंभुरेव हि ५२ अन्येन केन वा वेत्तुं शक्यते शिवहृद्गतं। एका गौरी विजानाति तद्भक्त्या नान्यया ध्रुवं ५३ सनत्कुमारेण गुहं प्रसाद्य
देवशूलिनः केदारेति वचः सर्वैरुच्यते लोकविश्रुतं ५४ परमं तद्रहस्यं तु न जानंति जना भुवि। एवं केदारनाथो हि मार्गो शिवो पूर्वमाविर्बभूव। पश्चाद्दंतर्धि-

१ - पा० भेद सूर्य०

मापस्वयमनुपमया लीलया कालपाकात्। श्रीमद्विश्वेशभूमौ पुनरपि दयया विर्बभौ काशिकायां भक्तानुद्धर्तुमिष्टान्जगदुपकृतये लिंगरूपी महेशः ५५ सा-
क्षाद्विश्वेश एव प्रगल्भदभयदः काशिकेदारनाम्ना काश्यां सर्वत्र दत्ता कुमतिभयकरी भैरवी यातना ५६ केदारेसा निरस्ता क्वचिदपि जनताभैरवी काशिभूमौ
भूयासुर्निर्भयास्ते गुरुतरकृपया तेन दत्ताभया। भूत्केदारेशलिंगे विधुधरस्य इति नभिदा मानुषे कार्यमेवं श्रुत्वा काशी कृताज्ञा खिलजननिकरा-
न्स्वाज्ञया कः प्रशस्ता ५७ तस्यैव प्रीतिपात्रं क्षितितलमनवत्काशिकेदारभागं तस्याज्ञा केन लंघ्या जनसुकृतवशा एव मास्ते विचित्रा श्रुत्वा
मुनीन्द्राः परमाद्भुतं तच्छंभो रहस्यं पुलकांकदेहाः। शिवप्रसादस्य विचित्रलीलां हृदा स्मरंतो विवशा बभूवुः ५८ इति श्रीकाशीमूलरहस्ये ब्रह्मवैवर्ते खिले
काशीकेदारमाहात्म्ये एकोनत्रिंशो ऽध्यायः २९ कथयत्नु सूत शंभुरहस्यं शिवलीलैकसागर। यां जेतुं पुरा शंभुर्देवीमकथयत्कथाः १ शतशः पूर्व
कल्पीयाः कीदृशस्ताः कथाः पराः। भवान्यपि विजानाति तासु काश्चित्सुदायिनः २ रहस्यातिरहस्यास्ताः शिवैकविदिताः खलु। यासां सारं विदन्नर्थं नैतामेयो
गताग्रणीः ३ भूमौ क्षेमकविर्भूत्वा समस्तग्रंथसारभूत् कृतः। यद्ग्रंथलोपकस्तोऽव्यासोऽप्यासीत्प्रयत्नवान् ४ तादृक्कथासारसुधा सीकरैर्नो निषेचय।
इति दृष्टस्तदा सूतः प्राह तान्ब्रह्मवादिनः ५ श्रूयतां वं मुनयः सर्वं तत्कथासारसंग्रहं। श्रुतं गुरोः प्रसादेन किंचिन्मे विदितं वदे ६ कल्पे कल्पे सृ-
ष्टिभेदाः कथाश्चित्राः शिवोदिताः। शिवे क्षेमेषु बहुषु संसेव्य परमेश्वरं ७ जीवा ब्रह्मादयो जातास्तथा देवांगना अपि। तेषां तासां कथां वक्तुं कः

१-२- पाठभेद- [illegible] ३- [illegible]

७७


शृक्तः श्रुतिविस्तराः६ तथापि काशीमात्रस्य कश्चित्स्वल्पा श्रुता मया। तान् संक्षेपतो वक्ष्ये बुध्यस्व शिवबोधनं६ देव्यै प्राह महादेवः कल्पभेदेन वै पुरा॥
शृणु देवि प्रवक्ष्यामि लीला मे प्रीतिकल्पिका।१० सर्वक्षेत्रेषु भूः सृष्टे काशीक्षेत्रं मे वपुः। त्रिशूलकंटकाग्रे मे सदा तिष्ठति निर्भयं११ प्रलये चोर्ध्वमुन्नम्य
महाकैलासमेष्यति। पुनः सृष्टे भुवं प्राप्य जनोद्धाराय तिष्ठति१२ भूमिष्ठमिव भात्येतदज्ञदृष्ट्या मृतादिवत्। मत्स्वरूपं ज्ञानदृष्ट्यां भाति सत्यं वरेदेवि१३
तत्र सल्लिंगरूपाणां सहिमानं वदे शृणु। विश्वेशोंकारकेदाराद्यादिभेदवत् शिवे१४ पूर्वं दशार्णदेशस्थः कदीवान्नाम वै द्विजः। सपुत्रः काशिकामागाद्धात्रा-
येश्रद्धया युतः१५ उवास वत्सां काश्यां केदारसविधे द्विजः। भार्याद्वयेन संयुक्तो नित्यं केदारमर्चयन्१६ सोमवारव्रतपरः दृढनियमः स्थितः। स्नात्वा सोमदिने स-
स्य गौरीतीर्थे विधानतः१७ धृतभस्मत्रिपुंड्रश्च रुद्राक्षालंकृतः सुधीः। शिवं संपूज्य विधिवद्व्रतोपपश्चात्कृताशनः१८ हीवरन्नफलक्षीरयथासंभव

वस्तुभिः। शिवनैवेद्यपूर्वैः सपत्नीपुत्रो महायशन्१९ उषित्वा वत्सां पश्चात्स्वदेशं गतवान्पुनः। कालेन निधनं यातः केदारप्रसादतः२० कश्यपो भूद्ब्रह्म
सुतस्तद्भार्ये चादितिर्दितिः। पुत्रस्तत्रा षडभवत्केदारप्रसादतः२१ शिवज्ञानं प्राप्य सर्वं भोगांते मां समापिपे॥ शृणु देवि प्रवक्ष्यामि देशे कोसलसंज्ञिके२२ सुद-
सो नामराजाभूत्सभार्यः ससुतः कृती। यवीयसि सुते राज्यं निक्षिप्यागात्स काशिकां२३ पुत्रभार्यायुतो वर्षं केदारसविधे वसत्। प्रदोषपक्षपक्षे सः स्नात्वा गौरीसरो वरे

७८

२४ भस्मत्रिपुंड्ररुद्राक्षधारी केदारमर्चयन्। विप्राननेकान्संभोज्य पश्चाद्भुनक्ति वै स्वयं२५ केदारे वत्सां स्थित्वा स्वराज्यं प्राप वै पुनः। कालेन निधनं प्राप्य केदा-
रेश प्रसादतः२६ स्वायंभुवो मनुर्जातः शतरूपा च तत्प्रिया। सुतो विवस्वानभवत्केदारेशप्रसादतः२७ शिवज्ञानं क्रमात्प्राप्य भोगांते मां समापपुः। शृणु

१-२ - पाठभेद सूर्य



देवि प्रवक्ष्यामि पांड्यदेशे स्थितो वणिक् २८ सुधनो नाम धनवान् शिवधर्मपरायणः । पुत्रभार्यायुतः काशीं यात्रार्थे समागतः २९ कृत्वा यात्रां यथावत्स केदारसविधे

वसन् । उवास अब्दद्वयं तत्र केदारेशं समर्चयन् ३० गौरीतीर्थे प्रतिदिनं स्नात्वा केदारमर्चयन् । शिवरात्रौ महाभक्तिस्तस्य शंभोः समर्चने ३१ अब्दद्वये गते तत्र शिवरात्रिद्वयेपि

सः स्नात्वा गौरीतीर्थे वै भस्मरुद्राक्षभूषितः ३२ रात्रौ च जागरं संपूज्य शंभुं यामचतुष्टये । पारणे ब्राह्मणान्भोज्य भक्त्या केदारसन्निधौ ३३ पश्चात्स्वयं कृताहारः पुत्रभार्यासु

संयुतः । शिवं प्रसाद्य स्वं देशं गतवान्सुधनो वणिक् ३४ कालेन निधनं प्राप्य केदारेशप्रसादतः । जातो हिमांशुस्तत्पत्नी रोहिणी तत्सुतो बुधः ३५ मन्वन्तरं प्राप्य भोगांते मामेवापुः प्रिये

शृणु । अन्यच्छृणु महादेवि सत्सकेदारवैभवं ३६ काश्मीरविषये कश्चिच्छूद्रः श्रीदासनामकः । तस्यासन्पंच तनयाः सप्रेमाश्च परस्परं ३७ श्रीदासो भार्यया सार्धं कालेन निधनं ग-

तः । अनाथाः पंच पुत्रास्ते मातापितृवियोगतः ३८ तीर्थं स्पृष्ट्वा ततो काशीमागताः सास्थिकास्तयोः । प्रक्षिप्यास्थीनि काश्यां ते कृत्वा यात्रां विधानतः ३९ केदारसविधं प्राप्य संस्थिता

स्तत्र वत्सरं । गौरीतीर्थे प्रतिदिनं स्नात्वा केदारमर्च्य च ४० किंचित्किंचिद्दिनं भक्त्या दत्वा तत्रावसंस्तदा । एवं स्थिते प्रदोषास्तु मंदवारयुतास्त्रयः ४१ तस्मिन्नब्दे समा-

यातास्तेषु शंभुं समर्च्य ते । रात्रौ केदारनाथाग्रे जागरं भस्मरुद्राक्षधारिणः ४२ संपूज्य शक्त्या प्रतितिथिं पश्चात्तेपि कृताशनाः । गताः पंच स्वदेशं ते कालेन निधनं गताः ४३ ।

केदारेशप्रसादेन गतिस्तेषां शृणु प्रिये । पौलस्त्यो दक्षो निध्रुवश्चैव मनुः सावर्णि रापूर्वनो ४४ अभूवन्पंच ते श्रीमत्केदारेशप्रसादतः । क्रमेणाप्य च मन्वन्तरं

नं भोगांते मां समागताः ४५ ॥ भूयः शृणु महादेवि मरुदेशे ग्रामेपुरे ॥ अंत्यजो दुर्घटो नाम तत्रासीद्धर्मवर्जितः ॥ ४६ ॥

१ - पाठ भेद लक्ष्मण०
२ - पाठ भेद सूर्य०

सांयात्रिकैर्म्लेच्छसंघैः सहायातः सकाशिकां। सांयात्रिका वस्तुजातं विक्रीय च गताः पुनः ४७ तेनैर्यातो दुर्घटस्तु नितरां रोगपीडितः। श्रीमत्केदारभूमौ स ग्रामात्संस्थितो बहिः ४८ मासे मासे कृष्णपक्षचतुर्दश्यां शिवां तिकं। राज्ञौ जनाः समागत्य केदारं पूजयंति वै ४९ बहिर्द्वारि स्थितो म्लेच्छो याचितं तांश्च जागरान्। शुभं करोतु केदारो युष्माकमिति याचयन् ५० याञ्चाव्याजाज्जागरितास्तेन षट् शिवरात्रयः। नामोच्चारोपि ग्रामस्थैः शिवरात्रिषु याचतः ५१ तस्य संघटितो दैवाज्जागरोप्यंत्यजन्मनः। दृष्ट्वा जनं समायान्तं मध्ये मध्ये च निद्रितः ५२ यावज्जागरणं तस्य नाभूत्तस्य तथापि तः। केदारो दयापात्रमभूत्तस्य गतिं शृणु ५३ पामामंत्ररुजः पश्चात्स्वदेशं प्राप्य कालतः। मृतिं प्राप ततः सोभूद्राहुनामाख्यः सिंहिकासुतः ५४ देवैः सहामृतं पीत्वा द्विधा भूतोपि दानवः। नवग्रहपदं प्राप श्रीकेदारप्रसादतः ५५ प्राप्य क्रमेण मद्ज्ञानं भोगांते मां समागतः। शृणु देवि प्रवक्ष्यामि भूयः केदारवैभवं ५६ कर्णाटदेशजा विप्रपत्नी नाम्ना कलावती। अंगदेशोद्भवा राजपत्नी नाम्ना विलासिनी ५७ घुर्जरी सुमती नाम्ना स्त्रीत्वा वैश्यांगना सती। विदर्भदेशजा नाम्ना पुराया कायस्थभामिनी ५८ स्वस्वदेशाच्च्युतास्तेपि विधवाः काशिकां ययुः। अपुत्रास्ताश्च नाथाश्च काशीं प्राप्य यथाविधि ५९ कृत्वा यात्रादिकं सर्वं विप्रान्पूज्य स्वशक्तितः। केदारमागतानंतु चतस्रोपि पृथक्पृथक् ६० तासामेवात्र केदारे संवभूव समागमः। कालं कालमिति प्रश्नपूर्वं सल्लापसंगतः ६१ स्वस्वदुःखं प्रवोचुस्ताः स्वस्वैधव्यानपत्यतां। वयमत्रैव संस्थित्वा केदारसन्निधौ विमः ६२ स्वं स्वं धनं व्ययीकुर्वन्या वा द्वित्तव्ययावधि अत्र स्थित्वा शिवं पूज्य द्विजातीनतिथिभिक्षुकान् ६३ सत्कुर्वंत्यो यथाशक्ति पश्चाद्यामस्वमालयं। इति निश्चित्य तास्तत्र स्थिताः केदारपार्श्वतः ६४ पतिं हृदि ध्यायमानाः श्वेष्ट देवं वदाद्यातः। गौरीतीर्थे प्रतिदिनं स्नात्वा केदारमर्चयंच ६५ नियतं द्वादशाब्दं ता धर्मबुध्या वसन् शिवे। सोमवारे प्रदोषे च शिवरात्रिषु सादरं ॥६६ अन्येषु व्रतमुख्येषु

१-२-३- पाठ भेद सूर्य०

सर्वेष्वभ्यर्च्य शंकरं। उपोष्य पायसं भक्त्या विप्रान्भोज्य तथातिथीन् ६७ पश्चाद्दर्शनं तिताम्लेवं का वक्लेश युताः स्थिताः किंचिद्द्विष्टधनाः स्वस्वदेशं प्राप्य यथा पुरा ६८

केदारे द्वादश समानीत्वा पश्चात्स्व सद्मसु। कालेन निधनं प्राप्ताः भूत्वा ताहां गतिं प्रिये ६९ केदारस्यांच दाता वै अन्नपूर्णा मम प्रियां। नित्यं संपूजयंतिस्म गंध पुष्पाक्षतादिभिः ७०

भौमवारे भृगोर्वारे नवरात्र्यां विशेषतः। उपोष्य प्रार्थयंत्यस्मैत्वत्पदं देहिनो इति ७१ तासां प्रार्थ्य भयादेवो केदारेशं प्रसाद्य च। अद्य यत्पदं यद्यत्तत्कृपाप्तवानेन ७२

कलावती विप्रपत्नी जातात्वं पूर्वकल्पके। विलासिनी राजपत्नी त्वमाभूत्पूर्वकल्पके ७३ सुमती धुर्जरी वैश्या वासाभूत्पूर्वकल्पके। पुण्याख्यापि चैवंदर्भी कायस्था भूच्छ-

चीपुरा ७४ एवं केदार कृपया अन्नपूर्णा प्रसादतः। कल्पभेदागतांस्तत्र सम ज्ञानं त्वयाग सह ७५ प्राप्य मदंतिकं देवि केदारेश प्रसादतः। भूयः शृणु महादेवि केदारेशस्य वैभवं ७६

कांच्यां स्थितः पुरा विप्रो धर्मशर्माभिधः कृती। विरक्तो ब्रह्मचारी वेदाध्ययन तत्परः ७७ यात्रार्थमागतः काशीं कृत्वा यात्रां यथाविधि। केदारं प्राप्य न्यवसद्दृढव्रतः

७८ स्नात्वा गौरीमहातीर्थे नित्यं केदारमर्चयन्। कुर्वन्माधोकरीं वृत्तिं माघुकरीं मासं कोटिशः ७९ समर्चयन्महालिंगे केदारे मासिमासिसः। सूर्ये धनुषि चार्द्रायां विशेषान्मां च

पूजयन् ८० कालं निनाय मद्भक्त्या चार्द्रायां समर्चयन्। त्वमिन्नयं पूजया देहि त्वज्ञानसंकल्पयं ८१ इति प्रार्थ्य गतः कांचीं मार्गेण निधनं गतः। केदारेशस्य कृपया

सोभूदत्रेः सुतः पुत्रः ८२ दुर्वासाख्यो मम तनुर्महानंदैकनिर्भरः। कल्पांते मामयाद्देवि केदारेश प्रसादतः ८३ अनसूया चात्रिपत्नी केदारेशस्य सन्निधौ। त्वामन्नपूर्णा

संपूज्य त्रिमूर्तीनां प्रसूर्भूत् ८४ भूयः शृणु प्रवक्ष्यामि पूर्वजो पर्वते द्विजः। स्त्रिया सार्धं धृतिर्नाम पूजयन्मल्लिकार्जुनं ८५ स्थितः कदाचिद्यात्रार्थं सभार्यः काशिकामगात्।

कृतयात्रः काशीपुर्यां भक्तियुक्तो यथाविधि ८६ केदारं प्राप्य पश्चात्तन्न्यवसद्दुत्सांपुचपद। तत्र षण्मासमाराध्य षट्समानिपमेनसः ८७ कृत्तिकायां मासि सिते शुक्लषष्ठी—

पुत्रादरात्। कार्त्तिके कृत्तिकायां स विश्वेशं समर्चयन् ८८ चंपाषष्ठ्यां स्कंदषष्ठ्यां स्कंदमर्च्य विशेषतः। कृत्तिकासु च षष्ठीषु समुपोष्य समर्च्य च ८९ स्नात्वा नित्यं गौरीतीर्थे केदारेशं समर्चयन्। अन्नपूर्णायुतं देवं पत्न्या संपूजयन् द्विजः ९० यथाशक्त्यातिथीन् विप्रान् भिक्षुकांस्तर्पयन् स्थितः। षड्वत्सरात्परं यातो भूप्रदोषे सकामतः ९१ मध्ये मार्गं मृतः कालाद् गृधाते नैव सा सती। केदारेश प्रसादेन जातोऽगस्त्यो महामुनिः ९२ लोपामुद्राभिधा पत्नी जाता सूर्येव सा सती ९३ स्कंदाद वाप्य मद्ज्ञानं नित्यतृप्तौ च दंपती ९३ जगत्प्रख्यात यशसौ कल्पांते माम वापतुः। शृणु देवि प्रवक्ष्यामि विंध्यारण्ये किरातकः ९४ दुर्नयाख्यो महापापी पांथान्बाधन् स्थितः पुरा। कंचित्कार्पटिकं हंतुं मुहुः शस्त्रधृक्वलः ९५ तदाभीत्या कार्पटिको ढुंढिं केदारनायकं। उच्चैश्चुक्रोश पाहीति तेन तं स्तंभितः करः ९६ स्तब्धहस्तो यदा व्याधः विप्रं प्राह नमस्य च। स्वामिन्कारस्सायुधो मे स्तब्धस्तं नमनो कुरु ९७ त्वादिष्टं देवं संस्मृत्य क्षमासारा हि साधवः। इत्येवं प्रार्थयंतं तं स्मृत्वा देवौ पुनर्द्विजः ९८ स्ववशीकृतवान् हस्तं किरातस्य यथापुरा। तदा किरातस्तं नत्वा त्वद्देवं मामुपादिश ९९ येनाहमपि संस्मृत्वा प्राह धन्यो भवत्विति। विप्रः प्राह तदा व्याधं काश्यां केदारसन्निधौ १०० गत्वा त्वं पूजय विभुं शिवं विघ्नेश पूर्वकं। तत्प्रसादात्कृतार्थस्त्वं भवेत्युक्त्वा गतो द्विजः १०१ व्याधः काशीं समागत्य कृत्वा यात्रां विधानतः केदारेशस्य सविधे स्थितः संवत्सरं भजन् १०२ गौरीकुंडे दिनं स्नात्वा केदारेशं समर्च्य च। मासि मासि चतुर्थ्यां विघ्नेशं संप्रपूजयन् १०३ महाचतुर्थ्यां विघ्नेशं विशेषेण समर्च्य च। उपोष्य जागरात्रौ विप्रान्भोज्य ततः परः १०४ स्वयं भुक्त्वा शिवं नत्वा गंतुम् प्रार्थयच्छिवं तदाहाकाशवाणी तं गच्छ श्रेयो भवेदिति १०५ तच्छ्रुत्वा संस्तुत्यं तं संतुष्टः स्वदेशं प्राप शीघ्रतः। कालेन निधनं यातो वेनो राजा बभूव सः १०६ पृथुर्वेनस्य तनयः सार्वभौमोऽतिकीर्त्तिमान्। सर्वविघ्नप्रशांतं संपूज्य त्वांते भुहि वसतिः १०७ तत्र प्राप्य शिवज्ञानं भोगांते मामुपाययौ। शृणु देवि प्रवक्ष्यामि पुनः केदारवैभवं १०८ कलिंगविषये भिल्लास्त्रय आसन्सुदुर्धियः। पूर्वपुण्यवशात्काशीं प्राप्य ते काशिकाभुवि १०९ मत्केदारं दंडपाणिं माधवं कालभैरवं। भृगोर्वारे मंदवो भौमे संपूज्य भक्तितः ११०

१-२-३- पाठभेद मूर्ख०   ४ - यह श्लोक मूर्ख० नहीं है

१. मत्स्तुवतः　　　　　　　　　　१ केदारेश्वर

विश्वावसुर्नारदश्चतुंबुरुप्रचाभवं दिवि। तत्र भुक्त्वा कल्पभोगां क्रमान्मद्ज्ञानयोगतः ॥ मामेवापुर्मां प्रणाम्य केदारेशप्रभावतः। कल्पे कल्पे च काश्यां वै केचिद्विश्वेशपूजकाः

११२ केचिदों कारादि लिंगान्यभ्यर्च्य च पृथक्पृथक्। देशांतरमृताः पश्चाद्देवत्वं प्राप्य कालतः ॥ मद्ज्ञानं प्राप्य भोगांते मामेवापुर्ध्रुवं प्रिये। ऋषयो मनवः साध्या विश्वेदेवा

महत्तपः जनः

मरुद्गणाः ११४ आदित्या वसवो रुद्रा दिक्पालाश्च ग्रहा योषितः। पाताललोकनिलया गंधर्वा यक्षकिन्नराः ११५ नागकन्याश्चाप्सरसो महर्जनतपः सदः। ब्रह्मविष्णुमहेशानां लोक

१. णाः　　　　　　　　　　　　　　　　　　　　१. विस्तरो

गाख्यातभूनृपाः ११६ कल्पे कल्पे पूर्वदेह काश्यां मल्लिंगपूजकाः। देशांतरमृता एव विद्धि त्वं देवयोनयः ११७ अन्यत्रापि मम क्षेत्रे पूज्य देवत्वमापिरे। कथा विस्तार-

78

तो वक्ष्ये यदि कल्पशतैरपि ११८ न पूर्यंते विचित्रास्ता मम लीलाविनोदजाः। लक्ष्मीजयार्थं ते वक्ष्ये शतमष्टोत्तरं पृथक् ११९ अज्ञातास्मया सर्वास्ताभिस्त्वं जयसे स्मां-

२ मृत　　　　　　　　१. तदा जित्वा कों देवी शिवमाप हस्तन्मुदा

इत्युक्त्वा भगवाञ्छंभुर्गौरीं संप्रेषयत्तदा १२० कदाचिन्नाकरोत्तास्ताः श्रुत्वा तु प्रीतिमुद्गमा। देवी समांतदा जित्वा शिवमाप हसन्मुदा १२१ काशी केदारनाथस्य महिमा केन-

रूपा

वार्यते। तथैवोंकार विश्वेशमुख्यानां लिंगवर्चसां १२२ महिमानं विजानाति सर्वपापेश्वरः। इत्याह मां पुरा श्रीमान्मद्गुरुर्वीरभद्रः १२३ शृणुत मुनिवेन्द्राः सत्कथा

तत्

सारभूतं परमशिवरहस्यं केनचित्तु समंततः। मम गुरुरपि दिव्यज्ञानवान् शंभुभक्त्या निखिलविदपि किंचित्साम्यवोचत्कृपालुः १२४ तदिह भवदनुज्ञा प्रेरितोहं यतस्तत्प्रकट

धाटि नाथ　　　　　　　　यु　　　　　　　　　　　　३

मवदमीशा गणनाथा विवादं। तदिह शिवरहस्यं नैव वाच्यं कुधीषु प्रवरमुनिगणेंद्राः पूयमेवात्र धन्याः १२५ काश्यां विश्वेशसद्मन्यथ विविधमहालिंगसद्मस्वनेकेष्वों-

कारादिष्वसंख्या द्विजनृपवरराजः शूद्रचांडालभिल्लाः शंभुं देवीं गणेशं गुहमखिलगणान्नंदिभृंगीशमुख्यान्तत्तत्पुण्येदिने तत्सुरसविधया देवमुख्या बभूवुः १२६

एवं चान्येष्वपीश प्रचुरमहिमवत्क्षेत्रवर्येषु जीवाः संपूज्य श्रीमहेशं ससुतगणवधूभक्तमाद्यं सुभक्त्या। देवत्वं भूपतित्वं सकलभुवनविख्यातकीर्त्या मुनित्वं सिद्धत्वं

१-२-३-पाठ भेद स्वयं.

पृ०४०
८२

स्वर्णचीत्व
सच्चदीत्वं तरुवर गिरिता मप्यवापु मुनीन्द्राः १२७ कल्पे कल्पे च लीलां विदधति गिरिशे स्वांशतो व्याप्य लोकं भिन्नं भिन्नं चरित्रं प्रति फलति तथाप्येक रूपं पुरावत् । सर्वं शंभोश्चिंत्यं विविध कृति विदो देव तिर्यङ्नराद्यं तच्छ्रुत्वा नन्य यैव श्रुतमिह तु भवेत्प्राणिनां पूर्व पुण्यैः १२८ यच्छ्रुत्वान प्रयाति प्रबल विषय दुर्वासना पूति पूर्णां संसाराब्धिं तदेतत्परम शिवमहास्त्रं दुहस्यं न चान्यत् । नष्टोपि भ्रष्ट चर्यो प्यति तर विषयासक्त चित्तोपि विप्राः श्रुत्वैतद् दुहस्यं तरति हि कृपया किं पुनः शंभु भक्ताः १२९ इति श्री काशी मूल रहस्ये ब्रह्म वैवर्ते खिले काशी केदार माहात्म्ये त्रिंशोऽध्यायः ३० मुनय० सूत सर्वज्ञ सद्बुद्धे देव्या वैवाह मुद्भव । पार्वत्याः कथं देव्याः परिणीतः परः शिवः १ तां वा कथं परिणाय त्परमात्मा सदाशिवः । तत्कल्याणं वद विभो येन धन्यो हिमाचलः २ स्थावरोपि जडोप्यस्य प्राप्ता सर्वाद्रि पूज्यता । शिवयोः संप्रसादेन कृतार्थाप्यभवन्नगः ३ इति पृष्टस्तदा सूतः प्राह तान्ब्रह्मवित्तमान् । शृणुध्वं मुनयः सर्वे सर्व कल्याण कारकं ४ ययोः कल्याण वृत्तांत श्रवणात्सर्व सिद्धिदं । सर्वस्य जगतः सृष्टौ परा शक्तिः शिवाज्ञया ५ बहु रूपा भवद्दक्षं व्याजीकृत्य पितृत्वतः । शिवांश जाताः स्त्र्यर्थं कश्यपादीन्दिवौकसः ६ स्वीकृत्य भर्तृ व्याजेन तया तत मिदं जगत् । देवतिर्यङ्मनुष्यादि सृष्ट्या पूर्वं जगत्त्रयं ७ शंभु पासनया प्राप्त वरा विधिमतो वयत । व्याप्य स्वांशेन त्रैलोक्यं पुंभेदं व्याप्त शंकरं ८ अतो बयम्महादेवी लीलोन्मुखमधीश्वरं । स्वयं हृद्यात्मनात्मानं कैलासाख्ये गिरौ स्थितं ९ स्वयं शक्तिः सती नाम भेदानमवृणोत्पतिं । ततो नाम्नो व्याजभूतं दक्षं कृत्वा पितृत्वतः १० परमात्मा नमीशानं प्रापनित्य विलासिनी । ईशभूतस्वभावात्स दक्षो देवान धिक्षिपत् ११ ब्रह्मादीनप्य किंचित्कान्कार्य दक्षतः । अयं शिवश्वशुरो त्यक्षमन्तस्य गर्वतां १२ देवाः सर्वे शिवं चित्ते ध्यात्वा किंचिन्न चोचिरे । तदा पार्थिवो ज्ञात्वा गर्व मत्याति वर्धितं १३ स्वमायया दुस्तरया श्वशुरं तममोहयत् । देवा अपि तदा चिंतन् गर्वभंगस्य कारणं १४ शिवं विनास्य गर्वस्य भंगकर्ता न हीति ते । दुर्बोधनात्म कर्तव्या यथा देवे पराध्यति १५ अयं तथा वयं कुर्मः इति ते तत्र दुःशा भवन् । तदाज्ञाका

काल्के० माण
अ०३०
८२

[marginal notes:]
१ सूतउवाच
१. वद देव्या विवाहजम्
१. पार्वत्या कथं
१. कल्याणकारणं
१. स्वपुर इत्यादि पद तस्य ग्रन्थे
१. ज्ञः शिवो
१. देवास्तदा चिन्तयन्ता
१. इति तद्दुःशासना: पुन:
१ - यह वा का सूर्य० अधिक है

१' जामाता

तिरोभूत्वा यागमेकं समारभन् १६ आरभ्य यागं तं प्राहुः कौटिल्येन दिवौकसः। शृणु दक्ष समर्थस्त्वं वयं तव वशानुगाः १७ जामातरं विना रुद्रं तव सर्वे विसा-

१' नत्वा दूरं न्यषीदन्त देवाः शिवपदे तदा

धकाः। इत्युक्तमात्रे संक्रुद्धो दक्षो मायाविमोहितः १८ देवैः सार्धं जगामाशु शिवसद्मनि संवृतः। देवाः सर्वे शिवपदं नत्वा दूरं न्यषीदन् १९

श्वशुरो गर्वितो दक्षो न नत्वाग्रे न्यषीदत

श्वशुरो गर्वितो दक्षस्त्वनत्वाग्रे न्यषीदत। सर्वदेवैः सहैवैनं कुशलं पृष्टवान् शिवः २० तदायं क्रोधतां प्राप्तः शिव मायाविमोहितः। माम

आदौ सत्कृतवानिति — भवजं — शिवः — १' सर्वं निन्द्यम्

प्ययं सर्वसाधारणं सत्कृतवानिति २१ श्वशुरं पूजनीयं मामनत्यापि शठः शंकरः। केन गर्वेण देवेशमानास्य दुरात्मनः २२ कृतं सर्वं निंद्य

79

मस्य मूर्खा जानंति शंकरं। इत्यादि निंदितैर्वाक्यैर्विनिंद्य परमेश्वरं २३ गतः सभां परित्यज्य कोपेन स्वालयं क्षणात्। ज्ञात्वेंगितं

देवगणा विनाशोऽस्यागतस्त्विति २४ शंभोर्भूसंज्ञया सर्वे तेनैव सह निर्ययुः। यागं समारभत्पश्चाद्दक्षो देवगणैः सह ॥ २५॥ नाका-

र्यच्छिवं गौरी यागं पूर्णफलप्रदो। श्रुतिवेद्यं हविर्भागमपि नादात्पुरात्मनः २६ तदा शिवाज्ञामुल्लंघ्य वर्त्तंतं पितृशब्दितं। नांगीकरोमीति शिवा पितृव्याजेन सर्वथा २७ इति

२' चिन्तान्विता शम्भोराज्ञां त्यक्त्वा गता सती — १' विनिश्चितम् — कृत्वा — जल्पती

चिंत्या गता शंभोराज्ञामपि परित्यजन्। दक्षस्य यज्ञवाटं तं स्वबंधुपरिपूरितं २८ त्वद्वित्वात्पितृत्वव्याजदेहं परित्यक्ष्येति तं वदन्। अग्नावंतर्दधे देवी धिक्त्वां दक्षेति संवदन् २९

तस्मिन्काले च हिमवान् जायया तपसि स्थितः। शिवं शिवां समुद्दिश्य स्वोद्धारायातिभक्तितः ३० तयोराविर्बभौ देवी पुत्रीत्वेनाखिलेष्टदा। नारदात्कृतवृत्तांतः शिवो देव्यास्तिरोभवं ३१

निवेशितो रत्नपीठे श्वशुरेण स्त्रिया सह। पौरोहित्ये विधिः भूतः शुभकर्माणि कारयत्॥५४ उत्कृष्टवाद्यनिनदैर्ध्वनिभिर्जयशब्दजैः। विप्राणां स्वस्तिवचनैस्तत्तुमुलैस्तत्र संसदि॥५५

जग्राह कन्यकां हस्ते शम्भुः श्वशुरयोः करात्। तयोः प्रचेतेन साकं सधाराः पूर्वमात्मभुः॥५६ कृतकृत्यावभूतां तौ दत्त्वा कन्यां महत्प्रभोः। अग्निकार्यं लाजहोमं प्रक्रमाश्माधिरोहणं॥५७

सर्वं यथावत्संपाद्य व्यकुर्वद्भगवान्सदः। पुष्पवृष्टिर्महत्यासीद्देवदुन्दुभिनिस्वनैः॥५८ जगुर्गन्धर्वराजानो ननृतुश्चाप्सरोवराः। प्रापायाता ववुस्तत्र सर्वेषां हृदयंगमाः॥५९ ततो हर्म-

होमं सर्वे देवा भोज्य विप्रान्यथाविधि। यथाकामं च संपूज्य देवान्विष्णुमुखानपि॥६० दत्त्वाभयं श्वशुरयोर्देव्या साकं परात्परः। गौरीदेवे द्विजे स्थानमारुह्य वृषभोपमे॥६१

शूरादीनां च कलहं विज्ञाप्य त्रिदशा अपि। शिवेन समनुज्ञाता हृष्टाः स्वस्थानमाययुः॥६२ एवं भवावतो लीलाविवाहाख्या जगत्पतेः। अचिंत्यस्याप्यलीलस्य भक्तानुग्रहकारिणः

॥६३ एवं शंभुर्हिमगिरेः प्रसादं कृतवान्पुरा। अपत्यैस्तपसा तस्य कस्योत्कर्षेच्छोर्वरप्रदः॥६४ अभ्रातृका पौराणे न युक्तेति शंकरः। पुत्रं मैनाकनामानमदाच्छ्वशुरयोः शिवः॥६५

यः पक्षघातभीत्या श्रीदेव्या भ्राता शिवाज्ञया। अद्याप्यास्ते जलनिधौ शिवान्नप्रसुतं मुदा॥६६ स एव केदारनाथः कलापंचदशात्मना। काश्यां लिंगाकृति भूत्कैलकात्मा हिमाचले॥६७

श्रीविश्वनाथः केदारे काश्यां केदारनामतः। सद्यस्तारयते लोकान्भो वै यातनां विना॥६८ श्रद्दध्वं ब्रह्मविच्छ्रेष्ठाः सत्यं मम गुरोर्वचः। य इमं शृणुते ध्यायं विवाहोत्सवमीशयोः

॥६९ स सर्वमंगलानां वै पात्रं शंभोः प्रसादभाक्। यं यं कामं समुद्दिश्य पठतेऽश्रूयते त्विमं॥७० तं तं कामं करगतं स्य सिद्धपतिर्नान्यथा। इति श्रुत्वा मुनिवरास्सानंदहृदयास्तता॥७१

तुष्टुवुः श्रुति मूर्धस्थैः स्तुतिभिः परमेश्वरं। अन्नानां पतये दिशां च पतये माहक्य शूनां पुनस्तेनानां पतये समस्तजगतां क्षेत्रौषधीनां सतां। वृक्षाणां पतये

शिवे च कुधियां दुस्तस्काराणां पुनः पुष्टानां पतये दीनाधिपतये सर्वात्मने ते नमः॥ ७२ ॥

१-२-३ - पाठभेद सूर्य०

अशिक्षयद्वीरभद्रो दक्षं देवानपि क्षणात् । ततो देवी बाललीलाविनोदात्तावत्तर्पयत ३२ गिरिंद्रपत्न्यपि तदा पूर्णानंदौ बभूवतुः । ततो देवी शिवप्राप्त्यै स्नेहाच्चाद्भुतं तपः

३३ देवोपि तां बहुविधं लीलार्थमपरीक्षयत । दृढचित्तां स्वात्मभक्तिं ज्ञात्वा देवो घृणानिधिः ३४ पुनर्विवाहविधिना तां गृहीतुमनन्यतो देवो देवो रहः कृत्वा प्रथमं दृढ सांविदं ३५

अचोदयत्तदा देवीं वदेति पितरौ मुदा । तदा देवी त्रपमस्त्यक्त्वा पित्रो वृत्तांतमावदत ३६ आसातां शिवं श्रुत्वा स्वानंदाब्धौ ममज्जतुः । अद्यानेक जनीनां नौ परिपक्वं फलं ध्रुवं ३७

यतः परात्मनः पूर्णादयापात्रौ बभूविव । देव्या विवाहसन्नाहः कृतस्तास्यां महाद्भुतः ३८ देवेन पूर्वं संदिष्टे मौहूर्तिके वरे द्विजे । जीवकाव्यवसिष्ठात्रिभृगुकुत्सादिभिर्वरैः ३९

कन्यावीतु कामानां संप्रदायानुरोधतः । वरयित्वा कन्यकां प्राक् कन्यापित्रोश्च संमतं ४० मौहूर्त्तिकं दिनमाये आनन्तत्पुत्रिका समात । तदा त्वष्टा समाज्ञाप्य सामग्री सिद्धिमातनोत ४१

हिमवद्गृहमागत्य विश्व कर्माद्रियाज्ञया । कल्पयामास तत्सारं तदनूपमं ४२ मंडप गृहवेद्यादि विचित्र वसते स्वयं । प्रत्युप्त नवरत्नानां कांत्या सौवर्ण राजतं ४३ रत्नकुट्

कुथास्तीर्णं सोपधानपदे पदे । मुक्तामणि वितानैश्च तोरणैः सुंदरं तलं ४४ चिंतामणिः कामधेनुः कल्पवृक्षः समाययुः । षड्रसान्नस्य संसृष्टौ कामधेनुः स्वयं स्थिता ४५ वस्त्रगंध

सुमोत्पादे कल्पवृक्षाः स्वयं स्थिताः । रत्नभूषणनिर्माणे स्वयं चिंतामणिः स्थितः ४६ गीतवादित्रकौशल्ये नारदाद्याः स्वयं स्थिताः । आगतानां च सत्कारे लोकपालाः स्वयं स्थिताः ४७

समग्रं दृष्ट्वा ब्रह्माभूतहरिः सर्वविचारकः । एवं विधानं संस्थाप्य सर्वे याता शिवांतिकं ४८ आनंतुं परमेशानं ब्रह्मऋषयोमराः । यातास्ते नमस्कृत्य प्रार्थ्य देवं समानयन् ४९ अचिंत्यं

शाक्ष्यारूढं तमगां देवसंस्तुतं । अप्सरोयक्षगंधर्वकिन्नरैः सेवितं प्रभुः ५० एवं क्रमाद्द्वारदेशे शाक्षादवरुह्य सः । दुग्धक्षालितपादाब्जात्ततो नीराजितः शनैः ५१ श्वश्रू दत्त

फलो हस्ते स्वास्तिवाचिस्म गृहं विश्वत । तत्पूर्वमेव श्री गौरी सर्वाभरणभूषिता ५२ कल्याणपीठे संविष्टा नवरत्नवितानके । धृत्वा करौ ब्रह्मविष्णो आगतां तां वेदि मंडपे ५३

१ - यह पद्य सूर्य० नहीं है

क्रु०वै० ८५ | का०के०मा

अस्मानुद्धर देवदेव भवतः पादं शरण्यं नतान् सर्वाभीष्टदमप्रमेयभगवद्धामप्रदं चांततः। नैवान्यं भयामते पद कृपात्केदारनाथ प्रभो मोक्षैक प्रथित प्रभाव विभ-
वा केदारभूत्ते प्रभो ७३ मोक्षैकप्रभवा सतं तव विभो वासाय नो दापय स्तुत्या नया च संतुष्टः परमात्मा सनातनः। संसूता[illegible]योगिनः साक्षाद्भव द्रुष संस्थितः ७४ उमया-
गणपैर्देवैः सुताभ्यां च समावृतः। प्राह प्रसन्नया वाचा मुनीन्संहर्षयन्वचः ७५ भक्ताः शृणुध्वं मुनयस्तुष्टोहं स्तुतिभिर्हिवः। ददामि वो वरं देव दुर्लभं योगिनामपि ७६ दत्तो
मोक्षस्तु भवतां पुनरावृत्तवर्जितं। यस्माच्छ्रुतं मे रहस्यं भवद्भिर्जनतारकं ७७ संतिष्ठतात्र वामावाथ भकुचापि तिष्ठत देहान्ते। यातमामेव गेहाद्गेहांतं यथा ७८ श्रोतॄणां पु-
द्रहस्यस्य फलमेतन्न संशयः। इत्युक्त्वांतर्दधे शंभु लिंगे सपरिवारकः ७९ कोटिसूर्यप्रतीकाशं दृष्ट्वा शंभुं मुनीश्वराः। सूतेन साकं सानंदहृदया विवशा भवन् ८० संभाज्य
सूतस्तानाह कृतार्था यूयमेव हि। युष्मत्सत्संगतश्चाहमपि धन्यो न संशयः ८१ शृणुत मुनिवरेन्द्रा वेदसारातिसारं परमशिवरहस्यं काशिकामूलसारं। शिववदनसरोजा-
न्निसृतं यः पिबेत्सो जननमरणदुःखं नैव चाप्नोति सत्यं ८२ निधिं सत्पुण्यानां निखिलजगतामेदनिलयं निराधारं मायाखिलगुणसदाधारमनिशं। शिवं शांतं नित्यं
त्वमनु वदति दिव्ये मधुमये रहस्ये तत्पुंसामकृतसुकृतां लभ्यते कथं ८३ कृतं पैस्तैः स्थिर समित कोटि[illegible]नि भवं महेशांघ्र्यस्याराधन विमलभाग्यैः च जनितं प्रवक्तुं श्रोतुं
वा विदितुमुपलब्धुं क्षममिदं रहस्यं श्रीशंभोर्नहि कुमतिभिः प्राकृतजनैः ८४ भवंतः सत्पुण्यास्त्वहमपि तथा युष्मदनुगः शिवज्ञानाधारं श्रुतमपि भवद्भिः शुभकरं।
रहस्यं श्रीशंभोस्तदिह भवतां श्रावितमपि प्रवक्ष्ये सत्यं वस्तदुभयमहो दैवघटितं ८५ न चेन्मे गुर्वग्रे गमनमथ तद्वाग्मृतसत्कथासारं ज्ञानं कथमुह सयात्रागममतेः भवे-
त्कृद्ध्वं श्रीशिवगुरुकृपापूर्वघटिका रहस्यप्राकट्ये निखिलजनतोत्तारणविधौ ८६ यो नित्यं परमेश्वरस्य चरितं केदारलिंगागतः सम्यक् श्लोकमर्धार्धपादमपि वा
भक्त्या पठेच्छ्रावयेत्। श्रोता पाठयिता तथा च पठिता सर्वेपि भुक्त्वा चिरं भोगान्निष्टतमान्प्रयांति चरमे काले शिवं शाश्वतं ८७ मासे श्रावणिके शिवप्रियकरो माघेथवा का-

अ०३१

८५

१ - पाठ भेद सूचि.
२ - यह श्लोक सर्ग. ० में नहीं है

त्तिकैवेसारे शिवमोदके प्रति दिनं त्वद्ध्यायमेकं पठन् यः केदारपुरः शिवः प्रियकरं भक्तान्जनान्श्रावयेत श्रीमच्छंभुरहस्यसारमतु-
लं सत्यं स शंभुप्रियः ८८ श्रोतारोपि शिवैकलग्नमनसा श्रुत्वा समग्रं मुदा सत्कारं परमेश्वरात्मकधिया संपूज्य विप्रं धनैः। वस्त्रैर्भूषणहस्तिवाजि-
सदनैस्तुष्टं प्रकुर्वंति ये तत्कृत्या तान्परमेश्वरः स्वहृदये नित्यं स्मरन्तारयेत् ८९ श्रुत्वा केदारसारं परमशिवमहासद्रहस्यं शिवोक्तं शैवान्धर्मा-
न्पुराणान्यपि शिवकथया सेतिहासानि भक्त्या। सम्यक्कृत्वा च पुण्यं भवति हि जनता यास्तु यत्तत्सुपुण्यं ९० तं लभ्येदत्र सौख्यं त्वतुलमिह
तथान्तेपि शंभोः पदाब्जं। शृणुत मुनिवरा द्राग्यद्वदाम्यद्य सत्यं सकलकलुषहारि श्रीमदेतद्रहस्यं श्रवणरतिमनीषा यस्य जायेत तस्य ९१ भूत
मशुभमशेषं ध्वस्तमित्यद्य मन्ये। एवं श्रुत्वा मुनीन्द्राः सकलमपि शिवज्ञानसारं रहस्यं। सूतं संपूज्य गंधप्रसववसनसद्रत्नहेमाद्यसंख्यैः।
वक्तारं चादितीर्थं तदुपगतसुरान्काशिकां विश्वनाथं ९२ काशीस्थान्देवसंघानपि विमलमनाः संयुतां कीर्तिकाख्यां। पंचक्रोशस्थदेवा-
नपि च बहुतरान्तीर्थसंघान्ससंगान् ९३ सम्यक्संपूज्य पश्चाच्छरणमुपययुः काशिकेदारनाथं नत्वा सम्यक्प्रपूज्य प्रकटदिविगिरा तस्य
दिव्याज्ञया ते ९४ स्वेच्छासंचारशीला हृदि विधृतशिवा नित्यमुक्ता विजह्रुः ९५ ॥ इति श्रीकाशीमूलरहस्ये ब्रह्मवैवर्त्ते
खिले काशीकेदारमाहात्म्ये परमेश्वरविवाहो नामैकत्रिंशोऽध्यायः ३१॥ हरिः ॐ तत्सत्॥ शुभं भूयात्॥

